SRI VENKATESVARA ORIENTAL SERIES No 8

EDITOR :—P. V. RAMANUJASWAMI, M.A.

श्रीः

केनोपनिषद्भाष्यम्

श्रीरङ्गरामानुजमुनिविरचितम्

KENOPANISHAD-BHASHYA

BY

SRI RANGARAMANUJA


CRITICALLY EDITED
WITH
INTRODUCTION, TRANSLATION INTO ENGLISH
AND NOTES

BY

DR K. C VARADACHARI, M.A., PH.D.

AND

D. T. TATACHARYA, Siromani, M.O.L.




1945

Price Rs. 2/-

PRINTED AT
TIRUMALAI-TIRUPATI DEVASTHANAMS PRESS,
TIRUPATI

CONTENTS



KENA UPAṆISHAD

WITH

BHASHYA

I

INTRODUCTION

According to orthodox arrangement Kenopaniṣad is placed after Īśāvāsyopaniṣad, though modern scholars hold that Kena chronologically belongs to the earliest period of the Upaniṣads, and Īśa to the second period.[1] Veṅkaṭanātha commented only on the Īśa Upaniṣad,[2] and it was left to Raṅgarāmānuja to comment on the other important upaniṣads. Amongst other Upaniṣads, Sudarśana Sūri otherwise known as Śrutaprakāśikācārya had commented on the Subālopaniṣad, because of its extreme importance to the understanding of the integral or organic philosophy of the Upaniṣads.

Śrī Raṅgarāmānuja, like so many others of his kind, led a quiet life and during a period that was not noted for any thing extraordinary in the life of the community to which he belonged. Neither the date of his birth nor of his demise has been recorded anywhere, which appears very strange when we remember that he was well known as a scholar of repute especially in all the branches of learning necessary for his ministry. The date however can be fixed roughly as he was the disciple of Anantācārya, the fifteenth occupant of the Gurupīṭha reckoned from Śrī Rāmānuja in the Vaḍagalai line. He mentions Doḍḍayācārya or Mahārya or Mahācārya (c. 1540–1565)[3] the famous author of *Pārāśarya Vijaya*, (a refutation of Appayya Dīkṣita's *Nyāya Rakṣāmaṇi*) and of the

1. Winternitz: *History of Sanskrit Literature* Vol. I.
2. cf. *Īśāvāysopaniṣad Bhāsya*. ed. and translated. S.V.O. Series No. 5.
3. Des cen. cat. XIX. 7677 Madras Oriental Mss. Lib. and Aufrecht Cat. Catal. I. 283,

Caṇḍamāruta commentary on the most brilliant controversial work *Śatadūṣaṇi* of Venkaṭanātha. He also controverts the writings of Appayya Dīkṣita himself. It is claimed that Appayya Dīksita and he were contemporaries, and it is probable that Raṅgarāmānuja was an younger contemporary of both these writers. Appayya Dīkṣita's date is variously fixed between 1552-1626 A.D. (A. V. Gopalacharya) or 1520-1592 A.D. (Mahāliṅga śāstri).[1]

That Raṅgarāmānuja lived about this time appears plausible from two facts. Raṅgarāmānuja was a native of Velāmūr, a village in the North Arcot District, South India. He belonged to the Sāmaveda. After his studies under Anantācārya (15th occupant of the Gurupīṭha after Śrī Rāmānuja) he was directly initiated into Sannyāsa, without going through the second āśrama of Gṛhastha. It is said that he was given the sannyāsa by the 15th occupant of the Parakāla Mutt pontificate, Mysore :—

Yatsevāvaibhavallabdhā mayā paramahamsatā
Tam aham śirasā vande Parakālamuniśvaram.
(*Chānd* Up. Bhāsya introductory verse 4)

According to the history of the Parakāla Mutt we get at only one definite date, namely, that the 21st occupant of the Parakāla seat was born in the year 1577 śaka corresponding to 1655 A.D. He came to the seat in his 22nd year, that is in 1677 A.D. Allowing roughly 20 years to each occupant we find that its 15th occupant must have lived about 1577 A.D. This is a date which corresponds with that of Appayya Dīkṣita. Raṅgarāmānuja might have been aged about 25 years about this time. We can therefore conjecture that Raṅgarāmānuja was born somewhere about the middle of the 16th century.

There is a story current amongst the ācāryas of a meeting between Raṅgarāmānuja and Doḍḍayācārya. Doḍḍayācārya

1. *Tattva Bindu* ; ed. Ramaswami Sastri, pp. 99-101. cf. Appayya Dīkṣita's *Siddhāntaleśasaṅgraha* : ed. by S. Suryanarayana Sastri, Introduction p. 3.

after a victorious debate paid the former a visit at Conjeevaram. Finding Raṅgarāmānuja was intensely pre-occupied with his books he stood there watching him for a while. Then he drew Raṅgarāmānuja's attention to his presence with the words "O you have been busy drinking honey!" Raṅgarāmānuja quietly replied "If you would drive away all the bees, I can indeed leisurely drink honey."[1]

We do not possess any details of his life except that he was *a very illustrious teacher of the Śrī-Bhāṣya as his title* Śrī-Bhāṣyāmṛta-varṣiṇam testifies. He seems to have written 60 works as he was also known as the *Ṣaṣṭi-prabandha-nirmātā*. All his works have not survived up to the present day and it has been almost impossible to find out the names of the lost works. The following are the works available to us: Upaniṣad-bhāṣyas on (1) Kena, (2) Kaṭha, (3) Praśna, (4) Muṇḍaka, (5) Māṇḍūkya, (6) Taittirīya, (7) Bṛhadāraṇyaka, (8) Chāndogya, (9) Śvetāśvatara, (10) Atharvaśikhā, (11) Māntrika, (12) Agnihṛdaya, and (13) Kauṣītaki Upaniṣads. He had written (14) Śārīraka-śāstrārtha Dīpika (on the Vedānta Sūtras), (15) Mūla-bhāva-prakāśikā on the *Śrī Bhāṣya* (16) Bhāva-prakāśikā (on Śrutaprakāśikā commentary on the *Śrī-Bhāṣya*), and (17) Viṣaya-vākya-dīpikā, commentary on the Upaniṣadic passages quoted in each *Adhikaraṇa* of the *Śrī-Bhāṣya*. (18) There is an original work called Śrī-Rāmānuja-siddhānta-saṅgraha which is yet in Mss. (a copy of this is in the S.V.O.I. Library collection). He had written Sanskrit commentaries on the Tamil Prabandha. But only two namely one on the *Tiruvāymoḷi* of Śaṭhakopa and the other on Āṇḍāl's *Tiruppāvai* are available. It is said that he wrote on

1 1st Meaning is God is the honey in the Upaniṣads. Doḍḍayācārya said Upaniṣads were being studied by Raṅgarāmānuja. Raṅgarāmānuja said that since Doḍḍayācārya had been driving away all the opponents to the Upaniṣads it was possible for him to be enjoying them.

The 2nd Meaning is Raṅgarāmānuja was never known as a debater but as a studious writer. A writer is an enjoyer too Doḍḍayācārya was well-known as the debater of his age, the teacher who drove away intruding honey bees which sought to rob the honey of Truth.

the Periyāḷvār's *Pallāṇḍu* and Madhurakavi's *Kaṇṇinuṇ śiruttāmbu*, but we have not been able to trace them anywhere. The other works are so far as we know and have every reason to fear, irretrievably lost.

The writings and style of Raṅgarāmānuja follow the model set by Venkaṭanātha, close, relevant and never loose.

II

KENOPANIṢAD

Kenopaniṣad or the Talavakāropaniṣad belongs to the Sāmaveda. Sāmaveda has two Brāhmaṇas, the Tāṇḍin and the Talavakāra or Jaiminīya. Tāṇḍin is itself divided into seven (i) Pañcāvimsa (25-book) Brāhmaṇa, (ii) the Sadvimśa (the 26th book), (iii) Chāndogya Brāhmaṇa, of which the first two chapters deal with marriage and gṛhya rites whilst the eight remaining chapters comprise the Chāndogyopaniṣad. (iv) Sāma-vidhāna-brāhmaṇa, (v) Devatādhyāya, (vi) Vamśa (geneology of teachers) and (vii) Samhitopaniṣad.

The Talavakāra Brāhmaṇa consists of five books Of this the Jaiminīyopaniṣad-brāhmaṇa forms the fourth book. The Kenopaniṣad is a part of this Jaiminīyopaniṣad-brāhmaṇa. The fifth is called the Ārṣeya-brāhmaṇa. According to DR. HANS OERTEL the Jaiminīya Brāhmaṇa contains four adhyāyas, each consisting of anuvākas which again contain khaṇḍas. The Kenopanisad is the 10th anuvāka of the fourth adhyāya.

Even as the Iśopaniṣad deals with Brahman as the all-pervading Self, the Kenopaniṣad deals with the Transcendent Nature of Brahman, transcendent to all types of cognition.

In the first khanda, Its transcendence to all sensory cognitions (including the sensorium, the mind) and inexpressibility and incommunicability are intimated.

In the second khanda, it is pointed out that this transcendence over all cognition is not absolute, a fact already suggested by the phrase '*anyadeva......*' in the first khanda. This is as it were explained to mean that the knowledge of the

Transcendent Brahman is of the form "I know it as that which is not unknown", that is to say, that there can be no *complete* knowledge of it, though not no knowledge at all.

In the *third* khanda, it is shown that even the chief Gods Agni and Vāyu were unable to know that Brahman, when It manifested Itself to them. They returned baffled. Indra also went, and as It disappeared he pursued his course till he met the radiant form of Umā at the same place where Brahman was.

In the fourth khanda, Umā-Haimavatī instructs Indra, the foremost of the gods, in the Brahman-knowledge. Then is intimated the truth that the experience of Brahman is like a lightning-flash. Finally is counselled the Upāsana of Brahman as Delight, whose subsidiaries are austerity, self-control, action and others.

It is declared that one attains the *svarga*, the highest place by this practice.

Thus the Upaniṣad in the first three chapters covers the *Tattva*, the nature of Truth, Brahman and knowledge regarding Him and at the end of the last chapter it instructs the *Hita* or the means of attainment and the *Puruṣārtha* or the goal of man.

Now speaking about the entire philosophy of this Upanisad we can say that Brahman is revealed here as the Instigator of all activities, and that He indeed is the vitality and the power behind all activities in the Universe. It is precisely because He is the inner impellor and sustainer of all activities of all things, ādhyātmically and ādhibhautically and ādhidaivically, that we are not able to know or grasp the entire nature of the Divine. God is greater than the instruments through which He acts. No source of knowledge can comprehend Him, for He is the knower who cannot be known He is the Incomprehensible but not absolutely for as inner self we know Him as the Delight. We can best know Him as the *Vana*, the desireable to us, the Delight. We can glean some knowledge of Him through instruction and meditation on Him.

The philosophy enunciated by the Kenopanisad is almost identical with the philosophy enunciated by the Īśopaniṣad,

but this Upaniṣad approaches the whole question from a most challenging angle. It shows that the Supreme Being will ever remain beyond the reach of all functions of our exteriorised consciousness, such as, speech or the Vedic Word which is creative power not the mere speech, mind (our sensorium which is reckoned as the eleventh organ, the sixth after the organs of cognition and the sixth after the organs of action), eye and the ear, for it is the inward impellor of all these functions which our exteriorised consciousness represents. Indeed it is because they cannot reflect backwards or turn upon themselves and cannot subsist without the Supreme sustaining their activities that the Supreme Brahman is described as the: *śrotrasya śrotram manaso mano yad vāco ha vācam sa u prāṇasya prāṇah cakṣuṣaś cakṣuḥ......* If the Īśopaniṣad described the inwardness and transcendence of the Divine Lord, the Kenopaniṣad reveals that, so far as the individual is concerned, in him too the Supreme Lord is the Source of all functions and activities. Knowing this the individual should not concentrate his vision on the importance of these functions as such but seek to trace their fundamental powers and abilities to the Divine. If in the Īśā it has been taught that the Supreme Being is the Self of the soul, the *satyasya satyam*, here, He indeed has been taught as the foundational supraconscient power behind all the conscient and vital and material activities. It is this that is asked to be known, since the second part of the khanda definitely rejects all limited idea of the Supreme as this or that.

The second khanda reveals that because the Supreme is beyond all these cognitive and other instruments, all of which recede unable to comprehend It, It is not absolutely unknown. If it is known that It is not entirely unknowable, then one can be said to have known It. A general knowledge of the Divine as the Source of all activities, all vitalities, all strengths, and knowings can indeed be had; for it is clearly stated that the one sure sign of the possession of the Knowledge of Brahman even in this general manner, grants to the knower an attractiveness in his own nature (4th Khanda 6: *enam sarvāṇi bhutāni*

samvānchanti.) But even this intuition of the Divine is not to be had except as a flash of lightning, for its initial manifestation is such. But by practice of the inner *tapas*, control and worship of the Supreme as the antaryāmin of the entire functions, this knowledge of the Divine Nature may become a continuous stream of experience. To such practisers, the Divine grants power to practise Knowledge and Immortality (Kena Up. II. 4).

The Divine is *the* Delight, *Tad Vanam* or Vanam; It is *Ānanda* as the Taittirīya Upaniṣad says, is the *Prīti* as the Bṛhadāraṇyaka Upaniṣad describes it. The Upaniṣads never tire of pointing out that the Supreme Brahman is desireable, is desired and ought to be desired. The illustration in the third and fourth khandas describing the process by which the Gods knew Brahman, shows neatly the importance of transcendence in the Nature of Brahman Who is the Self of the Gods also. This finely squares with the view of Śrī Rāmānuja who pointed out that when there is mention of worship of or address to Gods we should refer it to their Self, the Divine. It is this truth that was intimated by Śrī Vedanta Deśika in the *Īśāvāsyopaniṣad-bhāṣya* under the 18th Mantra. We have however to remember here in the context of this Upaniṣad that the gods Agni, Vāyu and Indra were not aware of this wonderful Being (Yakṣa) and they suffered from ignorance because of their *ahankāra* (egoism). They are thus powers of the terrestrial, atmospherical and celestial spaces alone and they too have to abjure the sense of egoism (*ahamkāritva*). That this Story is a valuable instruction and has integral place in relation to the first two khandas has been shewn by Sri Aurobindo in his stimulating commentary on this Upaniṣad[1] in the now long defunct "*Arya.*" The terms have to be interpreted so as to refer to Him alone either directly or else through them.

This is the first time that the Bhāṣya of Rangarāmānuja has been translated into English.

1. An articl entitled "Sri Aurobindo's commentary on the Kenopaniṣad" by Dr. F C. Varadachari is ready for publication

III

EDITIONS CONSULTED FOR COLLATION AND TRANSLATION:

DR. HANS OERTEL'S Jaiminiya Upaniṣad-Brāhmaṇa (J. Am. O.S. Ed.) has been consulted for the Upaniṣad-text.

1. *Kenopaniṣad-bhāṣya or Prakāśikā*: Telugu script; Gomatam Śrīnivāsacārya Ed. along with other Upaniṣads and Śankara's Bhāṣya etc., 1868 Aug. 20th.
2. *ibid.*: Grantha script; 1870 April.
3. *Kenopaniṣad* with Raṅgarāmānuja's commentary and that of other Prakāśikā-bhāsya included in Anandasrama and Pathak editions, edited by Nityasvarupa Brahmacari, Brindavan, in Devanagari Script.
4. *Daśopaniṣads*: Grantha Edition, Kumbakonam; Edited by Navanitam Krishnamacarya.
5. *Kenopaniṣad-bhāṣya* with commentaries of Śankara and Raṅgarāmānuja, Ed. Sridharasastri Pathak, Oriental Book Agency, 1919.
6. *Kenopaniṣad*; Anandasrama edition containing the bhāṣyas of Śankara and Rangarāmānuja.

About the last two editions we have to remark that the Viśistādvaita commentary called *Prakāśikā*, an appellation given by Raṅgarāmānuja to his Upaniṣad-bhāṣyas, included in them is not his at all The Commentary is apparently spurious, though it follows generally the Viśiṣṭādvaitic school. It is regrettable that the publishers did not try to get the trustworthy commentary of Raṅgarāmānuja. Further it may be remarked in this connection, that even the Īśāvāsyopanisad bhāṣya of Kūranārāyaṇaswāmin has suffered immensely at the hands of the Anandasrama editor. If the *Īśāvāsyopaniṣad* suffered mutilation, the Kenopaniṣad-bhāṣya is a different work fathered upon the well-known author. The Brindavan edition includes R's Bhāṣya, but points out that its author is unknown.

TEXTUAL VARIATIONS:

Ist Khanda: 2. The second line stops at *Prāṇasya prāṇah*: in JUB,[1] R and V.

at *Cakśuṣaśca cakṣuḥ*: in Ā & P.

3 and 4. are clubbed together by A and P and Hume as one mantra, so much so 3 and 4 run on without any punctuation mark.

The text followed by R and JUB is punctuated according to metre at the end of each line.

IInd Khanda: 1. *dahram* (JUB); *dabhram* (R); *daharam* (A) (or *dabhram.*)

1. JUB. runs up to *deveṣu*. In R it runs up to *rūpam*; A stops at *nūnam*.

5. JUB. *vivicya*; *vicitya* (R); *vicitya* (A,P); Daśopaniṣad-bhāsya ed. of Vedānta Vidyā Vilas press 1868 gives under Śankara bh. *vicintya* and under R. bh. *vicitya*.

IIIrd Khanda: 6. JUB. *nainad aśakam*; all others *naitad aśakam*.

9. JUB. *Ādadīya*: all others *adadiyam*.

10. JUB. *Nainad*: all others *naitad*.

IVth Khanda: 1. JUB. *Brahmeti hovāca*; all others *sā brahmeti hovāca*.

1. JUB. *Mahīyadhva*: others *mahīyadhvam*.

4. JUB. iti: others give *itīn nyamiśad*.

4. *nyamiṣad* (*niśad* as a variation) others read *nyamīmiṣad*.

1. JUB. (Jaiminīya-upaniṣad-Brāhmana is DR. OERTEL'S edition JAOS XVI Vol. Number I. pp. 79-260. The Upaniṣad consists of sections IV. 18 to IV 21 of the Brāhmaṇa).

5. JUB. *enad*: others *etad*.
JUB. *anenacaitadupasmara-*: R. *nacaitadupasmara-*.
JUB. *enad*: others *etad*.

TABLE OF CROSS-REFERENCES:

Kena 1 : cf. Kaṭha II. 6. 3.
Kena 2 : cf. Bṛh. IV. 4 18 ; Maitr. VI. 31.
Kena 3 . cf. Kaṭha II. 6 12 : Muṇḍ. III. 1. 8. Tait. II, 2. 4.
Kena 3 : *Var.* Īśa, 10.
Kena 13 ; II. 5 = *Var.* Bṛh. IV. 4. 14.
Kena 29 : (IV. 4) = Brh. II. 5. 7 ; Maitr. VII. 11.
Kena IIIrd Khanda. The Story of Yaksa is narrated in *Devībhāgavatam*,[1] XII, Chapter 8.

ABREVIATIONS

A.	=	Anandasrama ed.
B.	=	Nityasvarūpa Brahmachāri, Brindavan.
G.	=	Īśādi Daśopaniṣad-bhāṣyam ; Gopalānandaswāmi (Viśiṣṭādvaita comm.) Bombay 1932.
J. U B.	=	Jaiminiya Upaniṣad-Brāhmaṇa
N.	=	Navanītam Krishnamachariar's Ed. (Grantha script)
P.	=	Pathak's ed.
R.	=	Raṅgarāmānuja (Gomatam Śrīnivāsācārya's Editions ; Telugu & Grantha Script)
V.	=	Vani Vilas Memorial ed.

1. This reference was kindly supplied by Sri A. Padmanabhayya, B.A., Pleader, Tirupati.

श्रीः

श्री श्रीनिवासपरब्रह्मणे नमः ।

श्रीरङ्गरामानुजमुनिविरचितभाष्यसहिता तलवकारोपनिषदपरनामधेया

केनोपनिषत् ।

श्रीः

श्रीनिवासं परं ब्रह्म प्रणिपत्य विचिन्त्यते ।
केनोपनिषदो भाष्यं रङ्गरामानुजोदितम् ॥

सामवेदीये ब्राह्मणे शाखाद्वयम्—ताण्डिनां शाखा एका । तलवकारापरनामधेयानां जैमिनीयानामपरेति । अत्र आद्यायां पञ्चविंशब्राह्मणं, षड्विंशब्राह्मणं, छान्दोग्यब्राह्मणं (उपनिषद्ब्राह्मणं), सामविधानब्राह्मणं, देवताध्यायब्राह्मणं, वंशब्राह्मणं संहितोपनिषद्ब्राह्मणमिति बहवो भागाः । तत्र छान्दोग्यब्राह्मणगतेषु दशस्वध्यायेषु आद्यद्वये गृह्यधर्माः केचित्प्रतिपाद्यन्ते । अन्यदध्यायाष्टकं छान्दोग्योपनिषद्रूपम् । अन्तिमायां पञ्च भागाः । (प्रपाठक इति वा अध्याय इति वाऽयं विभाग इति विमृश्यम्) । अत्र आद्यं त्रयं कर्मैकपरम् । चतुर्थो भाग उपनिषद्ब्राह्मणाभिधानः । अत्रैवान्तर्गता तलवकारोपनिषदित्यप्युच्यमानेयं केनोपनिषत् । चरमः पञ्चमो भाग आर्षेयब्राह्मणमित्यभिधीयते ।—इति वैदिकग्रन्थजातविमर्शिनः केचिदाहुः । भाष्यान्तरे तु

> केनेषितमित्याद्योपनिषत् परब्रह्मविषया वक्तव्येति नवमस्याध्यायस्यारम्भः । प्रागेतस्मात् कर्माण्यशेषतः परिसमापितानि । समस्तकर्माश्रयभूतस्य च प्राणस्योपासनान्युक्तानि कर्माङ्गसामविषयाणि च । अनन्तरं च गायत्रसामविषयं दर्शनं वंशान्तमुक्तम् ।

इति केनोपनिषद्घटितस्य भागस्य नवमाध्यायत्वमुक्तम् । तत्र इतः पूर्वेऽध्यायाः क इति गवेषणीयम् ।

अथास्माकं सुलभं तु जैमिनीयोपनिषद्ब्राह्मणं प्रथमं देशान्तरे तल्लिप्या एकाधिकशतो वर्षेभ्यः पूर्वं मुद्रितम् । अनन्तरमस्मद्देशे तदेवोपजीव्य द्वाविंशतेर्वर्षेभ्यः पूर्वं देवनागर्यां 'दयानन्दमहाविद्यालय-संस्कृतग्रन्थमालायां तृतीयतया मुद्रितम् । अत्र विभागः अध्यायः अनुवाकः खण्ड इति । अध्यायाश्चत्वारः । तेष्वाद्ये अष्टादशानुवाकाः । तत्र प्रत्यनुवाकं खण्डसङ्ख्या क्रमेण एवम्—७ ३ ४ ४ १ २ २ ३ ३ २ २ ५ २ ४ ४ ३ ३ ५ (=६०). द्वितीये पञ्चानामनुवाकानां २ ४ ३ ३ ३ (=१५) इति क्रमेण खण्डाः । तृतीये सप्तानां ५ ५ ४ ५ ९ ९ ५ (=४२) चरमे चतुर्थे द्वादशानां १ १ १ १ १ ३ २ ५ २ ४ ५ २ (=२८). अस्मिन् चरमेऽध्याये चतुःखण्डो दशमोऽनुवाकः केनोपनिषत् । अत्रत्याया अस्या उपनिषदः उपनिषद्भाष्यकोशेषु दृश्यमानायाश्च बहुषु स्थलेषु पाठभेदाः सन्ति । ते टिप्पण्यां तत्र तत्र दर्शिताः ।

॥ हरिः ओम् ॥

केनेषितं पतति प्रेषितं मनः
केन प्राणः प्रथमः प्रैति युक्तः ।
केनेषितां वाचमिमां वदन्ति
चक्षुःश्रोत्रं क उ देवो युनक्ति ॥ १ ॥

अतसीगुच्छसच्छायमञ्चितोरस्स्थलं श्रिया ।
अञ्जनाचलशृङ्गारमञ्जलिर्मम गाहताम् ॥
व्यासं लक्ष्मणयोगीन्द्रं प्रणम्यान्यान् गुरूनपि ।
व्याख्यां तलवकारोपनिषदः करवाण्यहम् ॥

परमात्मस्वरूपं प्रश्नप्रतिवचनरूपप्रकारेण प्रकाशयितुं प्रस्तौति—केनेषितं पततीति । मनः केन वा प्रेषितं प्रेरितं सत् स्वविषये प्रवर्तत इति भावः । इषितम् इष्टम् मतम् । प्राणानां मध्ये प्रथमः प्राणः मुख्यः प्राणः केन प्रेरितः सन् प्रैति प्रकर्षेण सञ्चरति । तथा केन वा प्रेषिताम् इमां वाचं वागिन्द्रियम् अवलम्ब्य व्यवहरन्ति लोकाः । तथा चक्षुःश्रोत्रयोश्च क उ प्रेरकः । अचेतनानामेषां चेतनाप्रेरितानां कार्यकरत्वासम्भवात् । इति गुरुमुपेत्य शिष्यः पप्रच्छेत्यर्थः ॥ १ ॥

श्रीरङ्गरामानुजमुनिविरचितं प्रकाशिकाऽभिधानमेतदुपनिषद्भाष्यं आन्ध्रलिप्यां ग्रन्थलिप्यां च मुद्रितमस्मिन् प्रदेशे लब्धप्रचारम् । अत्र सन्देहास्पदानि शोधनीयतया प्रतिभान्ति च बहूनि स्थलानि सन्ति । तत्रात्रकोशः प्रयत्नेन चिरादप्यन्विष्यमाणो नैकोऽपि लभ्यते । सम्भावितसमीचीनपाठस्तु तत्र तत्राधः प्रदर्शिता ।

श्रीरङ्गरामानुजीयमित्येव पूनानगरे आनन्दाश्रमपुस्तकमालायां तदुपजीवनेनान्यत्र च किमपि व्याख्यानमस्या उपनिषदो नागरलिप्या मुद्रितमुपलभ्यते । अस्मिन् प्रदेशे लब्धप्रचारस्य श्रीरङ्गरामानुजभाष्यस्य अस्य च न कश्चित् सम्बन्धः । क्वचित् क्वचित् योजनाप्रकारभेदो दृश्यते । शैल्यां गाम्भीर्यादिगुणवैकल्ये च परिशील्यमाने अर्वाचीनं कृत्रिममिदमिति निश्चेतव्यं भवति । आद्यन्तमङ्गलराहित्यमप्यत्र एवमध्यवसानं द्रढयति ।

१ मं. प्रस्तौति प्रश्नप्रतिवचनमध्ये आद्यमं प्रश्नं निबध्नातीत्यर्थः । स्वविषय इति । इषितमित्यस्य पर्यवसितार्थोऽयम् । इड्वर्जितं रूपमाह इष्टमिति । इच्छार्थस्य प्रकृते असम्बन्धादाह मतमिति । मननस्य मनोव्यापारस्य गोचरं विषयमिति । प्राणानाम् जीवोपकरणानाम् । प्रकर्षेणेति । म्रियत इत्यर्थोऽत्र न सम्भवति । वदन्तीति वदनकर्मत्वात् वाचमिति शब्दः प्रतीयते । स तु इन्द्रियप्रकरणे न सङ्गतः । अतो विवक्षितमर्थमाह वागिन्द्रियमित्यादिना ।

श्रोत्रस्य श्रोत्रं मनसो मनो यद्
वाचो ह वाचं स उ प्राणस्य प्राणः ।
चक्षुषश्चक्षुरतिमुच्य धीराः
प्रेत्यास्माल्लोकादमृता भवन्ति ॥ २ ॥

गुरुः प्रतिवक्ति—श्रोत्रस्य श्रोत्रमिति । यच्चक्षुरादीनां प्रकाशकं चक्षुराद्यनधीनप्रकाशञ्च, अप्राणाधीनप्राणनञ्च यत्, स उ स एव । इत्येवं अतिमुच्य ज्ञात्वा अस्माल्लोकात् अर्चिरादिना मार्गेण गत्वा मुक्ता भवन्तीत्यर्थः ॥ २ ॥

कार्ये शब्दे करणीभूतत्वात्त्वमुपचर्यते । तेन इषितामिति इन्द्रियविशेषणं वदन्तीति शब्दकर्मक क्रियासम्बन्धः उभयमुपपद्यते । उपचारवर्जने तु एकमर्थः पर्यवस्यतीति ।

—श्रोत्रयोरिति । अत्र पाठोऽन्वेष्यः । एषामिति । मनआदीनां पञ्चानाम् । 'अथ ह प्राणा अहंश्रेयसे व्यूदिरे' इत्यादिषु एतान्येव पञ्च प्रतिपाद्यन्त इति स्मर्तव्यम् । चेतनाप्रेरितानामिति । 'वाचमिमां वदन्ति' इति वदतः शिष्यस्य मनआदिकरणानामधिष्ठातारो विदिता एव । तथापि तत्प्रेरकप्रश्नं कुर्वतस्तस्यायमभिप्रायः—"करणत्वादवश्यं केनचित्प्रेरितमिति वाच्यम् । न तावज्जीव एव प्रेरकः । तेन निगृह्यमाणस्यापि मनसो विषयं प्रति पतनात् । अतो बलवता केनचिद् देवेनैव प्रेरितमिति वक्तव्यम् । स कः" इति । एवमुत्क्रामन् प्राणो न केनचिज्जीवेनावस्थापयितुं शक्यते । वागादिनियमनं च न स्वेच्छानुसारं कर्तुं शक्यत इति न जीवोऽत्र नियामक इति । अगम्भवादिति । अगम्भवात् विलक्षणः कश्चन प्रेरकोऽस्ति । स इति पूर्वेणान्वयः । इतीति । प्रश्नात्मकमन्त्रमात्रं श्रूयते । आख्यायिकास्वरूपपूर्तये अश्रुतब्राह्मणभागार्थोऽनुसन्धेय इति भावः ।

२. गुरुरिति । अनन्तरखण्डप्रथममन्त्रे 'मीमांस्यमेव ते' इत्येतदन्तस्येयमवतारिका । यच्चक्षुरादीनामिति । श्रोत्रस्येत्यारभ्य चक्षुरित्यन्तमेकं वाक्यम् । यदिति श्रोत्रमित्यादौ प्रत्येकमन्वेति । यत् श्रोत्रस्य श्रोत्रम्, यन्मनसो मन इति चक्षुःपर्यन्तम् । वाचमिति प्रथमार्थे व्यत्ययेन द्वितीया । स उ स एव इति यच्छब्दार्थप्रतिनिर्देशः । भवता पृष्टो देव इति प्रश्नार्थानुषङ्गेण वाक्यपूर्तिः । एवमवान्तरवाक्यपूर्तिज्ञापनाय इह मन्त्रे चरमनिर्दिष्टस्यापि चक्षुषः चक्षुरादीनामिति प्रथमग्रहणमिति ज्ञेयम् । अयं वाक्यार्थः ज्ञानक्रियायां कर्मेति स्फुटयन्नाह इत्येवमिति । लिङ्गविशेषवर्जं ब्रह्मेति सामान्यतो बुद्धौ कृत्वा यदिति क्लीबम् । देव इति विधेयानुरोधात् स इति पुमान् । यद्यपि केनेति प्रश्नस्य तेनेति तृतीयया कर्तृवाचिन्या उत्तरमुचितम् तथाप्यन्ते क उ देव इत्यपि पृष्टत्वात् सर्वसाधारण्येन क एषां प्रेरक इति प्रश्नं कृतं कृत्वा प्रथमयैवोत्तरं युज्यते ।

अयमत्र भाष्याभिप्रायः । तरति शोकं ब्रह्मविदित्याकर्णितवान् कश्चित् कञ्चित् तद्विदमुपसद्य भूयोभूयस्तेनोपदिष्टं तच्छ्रुत्वाऽप्यतृप्तः, वक्तुर्वाचः श्रोतुः श्रोत्रस्य च कार्त्स्न्येन तद्विषयज्ञानजनने असामर्थ्यं पश्यन्, एवं चक्षुषस्तत्साक्षात्कारोत्पादने मनसः सर्वथा तन्मननिष्पादने च शक्तिवैकल्यं निरूपयन्, जीवानां ज्ञानसाधनतयैव सृष्टेष्वेषु करणेषु अवश्यं विज्ञेयेऽर्थे कुण्ठितशक्तिषु

न तत्र चक्षुर्गच्छति न वाग्गच्छति नो मनः ।
न विद्मो न विजानीमो यथैतदनुशिष्यात् ॥ ३ ॥

तदेव प्रपञ्चयति—न तत्रेति । तर्हि तत् कथमुपदेष्टव्यमित्यत्राह—न विद्मो न विजानीम इति । किं तदिति पृष्ट आचार्यः नान्तरिन्द्रियेण न बहिरिन्द्रियेण ज्ञेयं तदित्येव तदुपदिशेत् ॥ ३ ॥

अन्यदेव तद् विदितादथो अविदितादधि ।
इति शुश्रुम पूर्वेषां ये नस्तद् व्याचचक्षिरे ॥ ४ ॥

ननु सर्वात्मना तस्य ज्ञानाविषयत्वे तुच्छत्वं स्यात्, ब्रह्मजिज्ञासया गुरूपसद-

---

नोन्मीलनादिकरणात् । एतान्येव न गच्छन्ति । किमुत मनः यदेवमामनन्ति—'मनसो वशे सर्वमिदं बभूव । नान्यस्य मनो वशमन्वियाय' इति । यद्वा नो मनः नापि मनः । "यतो वाचो निवर्तन्ते । अप्राप्य मनसा सह" इति प्रसिद्धाशक्तित्वात् । एषामिन्द्रियाणामाप्यायनेन प्राणस्य ज्ञानसाधनत्वम् । न च तदधीनस्वरूपप्रवृत्तिरयं तद्विषये चक्षुरादीनां प्रसतीमवबोधनशक्तिमुत्पादयितुमलम् । इति पूर्वोक्तमिह किञ्चित्प्रपञ्चितम् ।

उत्तरार्धमवतारयति - तर्हीति । नान्तरित्यादि । ज्ञानार्थकधातुद्वयोपादानादिन्द्रियभेदः । विजानीम इत्युपसर्गेण वैशद्यावगमात् बहिरिन्द्रियकरणता । उत्तमपुरुषपरित्यागेन सर्वसाधारण्यमज्ञानस्य वक्तुं ज्ञेयमिति । एतत् यथा यादृशं तत् न विद्मो न विजानीमः । इतीत्यध्याहार्यम् । एवमुपदिशेदिति योजनीयमिति भाव. ।

३. 'न तत्र चक्षुरादिकं गच्छति । तथा सति एतद् ब्रह्म यथा येन प्रकारेण अनुशिष्यात् यः कश्चिदाचार्य उपदिशेत् तं प्रकारं न विद्मः सामान्यतोऽपि न जानीमहे न विजानीमः नैव तु विशेषतो जानीमः ।' इत्यपि योजना सम्भवति । निर्विण्णाय उपसन्नाय शिष्याय तदुपदेशः सर्वथा न शक्य इत्यापाततोऽपि कथनमनुचितमिति, अनुपदं स्वं प्रति स्वाचार्यैस्तदुपदेशः कृत इति वक्ष्यमाणतया तद्विरुद्धं सर्वथा उपदेशाशक्यत्वकथनमिति च मन्यमानेन तु योजनान्तरमाश्रितम् ॥ ३ ॥

४. नन्विति । अयं भावः । चक्षुरविषयत्वात् प्रत्यक्षं तावन्नास्ति । तत्प्रतिनियतस्य कस्यचिल्लिङ्गस्य प्रत्यक्षतोऽदृष्टत्वादनुमानमपि नास्ति । वाक्श्रोत्राविषयत्वात् शब्दप्रमाणसम्भवोऽपि निरस्तः । तथा च प्रमाणसामान्यविरहे तस्य शशशृङ्गायमाणतैव । एवं सति 'अनुशिष्यात्' इति तस्य य उपदेश उक्तः स कथं घटेत । न हि तुच्छं किमपि कश्चित् प्रेक्षावानुपदेष्टुं प्रवर्तेत श्रोता वा श्रोतुमिति । तेषामिति । अस्य वाचमित्युत्तरत्रान्वयः । 'इति शुश्रुम' इति मन्त्रस्थस्य इतिशब्दस्य 'इतीमां वाचम्' इत्यर्थ इति भावः । सर्वात्मनेति । विदितादिति भूतकालप्रत्ययेन विदिक्रियायाः परिसमाप्तिद्योतनात् इत. परं वेदितव्यं किञ्चिदपि नावशिष्यत इति प्रतीयते । तेन सर्वात्मनेत्येतल्लाभः । अपीति । मन्त्र एतदश्रवणेऽपि एकवाक्योपादानन्यायेन -समुच्चयप्रतीतिर्भवतीति भावः । सर्वात्मनेति । अविदितादिति निषेधः न कल्पमित्यादिर्येथ,

अपेक्षिते च परतत्त्वज्ञाने सर्वथा दुर्लभे शरीरधारणोपयुक्तः सर्वेन्द्रियाप्यायकतया तेषु श्रेष्ठ इति प्रसिद्धः मुख्यः प्राणोऽपि व्यर्थ इति मन्यमानोऽत्यन्तं विषण्णः, अन्ते धरिष्ठं कञ्चिदाचार्यमुपेत्य पप्रच्छ - जगत्कारणवस्तुविज्ञानात् संसारनिवृत्तिं वदन्ति । तेन सृष्टा नियम्यमानानि मनआदीनि ज्ञानकरणानि अलब्धविषयाणि न तद् गोचरयितुं शक्नुवन्ति । एवंविधेष्वेषु तत् कारणवस्तु कथमहं करतलामलकवद् विद्याम् । तथा वेदनाभावे कथमहं मुक्तः स्याम्—इति ।

तं प्रतिवदन् आचार्य इदमाह—*यथा कश्चित्तमसि वस्तुदर्शनाय दीपमारोपयति अपेक्षितं* देशं नयति, एवं सर्वथा तदधीनो दीपः वस्त्वन्तराणीव तमपि पुरुषं प्रकाशयति । न तथा परेण देवेन नियम्यमानं श्रोत्रादि स्वस्वविषयानिव तं नियन्तारमपि प्रकाशयितुमीष्टे । एवमिन्द्रियाणां *विषयनियमो देवसङ्कल्पाधीनः । स हि श्रोत्रं शब्दग्रहणाय ससर्ज । श्रोत्रं ग्राहकं प्रकाशकं* बोधकं शब्दस्य ग्राह्यस्य प्रकाश्यस्य बोध्यस्य । न तु कदाचित् शब्दो ग्राहकः श्रोत्रं ग्राह्यमिति भवति । इत्थं यथा स्वविषयभूतशब्दापेक्षया ग्राहकैकाकारं श्रोत्रं न तु जातु तस्य ग्राह्यतां याति तथा श्रोत्रापेक्षया स देवः श्रोत्रस्य श्रोत्रम् अस्मच्छ्रोत्रस्य ग्राहकः । एवं ग्राहकः सन् कथं ग्राह्यो भवेत् । एवं मनआदिविषयेऽपि द्रष्टव्यम् । न च त्वया, ज्ञानसाधनानीमानि यदि ब्रह्मज्ञानं न जनयन्ति तर्हि कथमहं तत् सम्पादयेयम्, कथं मुक्तः स्यामिति भेतव्यम् । श्रोत्रादिभिरमात्यं तदिति ज्ञानस्यैव मुक्तिसाधनत्वात् । दुस्सम्पादस्य कार्त्स्न्येन ब्रह्मज्ञानस्यानपेक्षितत्वात् । धीरा अत्र न संसरन्ते । एवं ज्ञात्वैव तु मुक्ता भवन्ति । तस्मात् त्वया कथमपि विषण्णेन न भाव्यम् —इति ।

एतेन 'मनआदीनां स्वस्वविषये यः प्रेरकः स कः' इति प्रश्नस्य 'मनआदीनां प्रेरकं ज्ञात्वा मुक्ता भवन्ति' इति कथमुत्तरं भवितुमर्हतीति शङ्का निरस्ता । मुक्तिसाधनतया विहितं यत् परिपूर्णब्रह्मज्ञानं तद् ब्रह्मणोऽतीन्द्रियत्वात् कथं सम्पादनीयमिति प्रश्नः । सर्वेन्द्रियागोचरं तत् कार्त्स्न्येन ज्ञातुमशक्यमित्येतज्ज्ञानमेव मुक्तिसाधनमित्युत्तरमिति प्रतिपादितत्वात् । सर्वमिदं "मनश्चक्षुरादीनां प्रकाशकं चक्षुराद्यनधीनप्रकाशं च" इति भाष्यतात्पर्यपर्यालोचनया लभ्यत इति वेदितव्यम् । एतेनैव इदमपि निरस्तं यच्छङ्क्यते—अतिपूर्वो मुच्यतिर्ज्ञानेऽप्रसिद्धः । तस्मात् भूमविद्यायां 'अतिवादी' 'एष तु वा अतिवदति' इति प्रयुक्तस्य अतिपूर्वस्य वदतेर्यथा अतिक्रान्तवदनमर्थ इत्यभावि तथाऽत्र अतिवेद्यमोचनमर्थ इति युक्तम् । शिष्यो हि ब्रह्मणो यावद् ज्ञानं शक्यं ततोऽधिकमपि स्पृहयमाणो ब्रह्म अतिवेद्यमिच्छति । तदतिवेद्यत्वं मुक्त्वेत्युक्तं भवति ।—इति । अत्र हि मोक्षसाधनं परदेवताज्ञानमिच्छति । तत्र अतिज्ञानेच्छां विमुच्य अमृता भवन्तीत्युक्ते अतिज्ञातुमशक्यमिति ज्ञात्वेत्येवार्थो वाच्यः । अन्यथा ज्ञानेच्छापरित्यागमात्रेण मुक्त्यनुपपत्तेः । तत्र अतिज्ञातुमशक्यत्वस्य 'श्रोत्रस्य श्रोत्र'मित्यादिनैव लब्धत्वात् ज्ञानार्थधातुमात्रमुत्तरत्रापेक्ष्यते । सम्भवति च तादृशेच्छापरित्यागरूपत्वं ज्ञानस्य । 'भावान्तरमभावः' इति न्यायात् । तस्मात् सूक्तं 'अतिमुच्य ज्ञात्वा' इतीति ॥ २ ॥

पूर्वार्धमात्रमवतारयति—तदेवेति । श्रोत्रस्य श्रोत्रमित्यादिनोक्तं चक्षुराद्यनधीनप्रकाशत्वमेवेत्यर्थः । न तत्र चक्षुर्गच्छति । "न सन्दृशे तिष्ठति रूपमस्य न चक्षुषा पश्यति कश्चनैनम्" । न वाक् । वक्तुराचार्यस्य वागेव न गच्छति चेत् श्रोतुः शिष्यस्य श्रोत्रं कथं गमिष्यति । नो मनः नैव मनः । चक्षुरादिषु अस्माकं किञ्चित् स्वातन्त्र्यमस्तीव । निमील-

न तत्र चक्षुर्गच्छति न वाग्गच्छति नो मनः ।
न विद्मो न विजानीमो यथैतदनुशिष्यात् ॥ ३ ॥

तदेव प्रपञ्चयति–न तत्रेति । तर्हि तत् कथमुपदेष्टव्यमित्यत आह–न विद्मो न विजानीम इति । किं तदिति पृष्ट आचार्यः नान्तरिन्द्रियेण न बहिरिन्द्रियेण ज्ञेयं तदित्येव तदुपदिशेत् ॥ ३ ॥

अन्यदेव तद् विदितादथो अविदितादधि ।
इति शुश्रुम पूर्वेषां ये नस्तद् व्याचचक्षिरे ॥ ४ ॥

ननु सर्वात्मना तस्य ज्ञानाविषयत्वे तुच्छत्वं स्यात्, ब्रह्मजिज्ञासया गुरूपसद-

---

नोन्मीलनादिकरणात् । एतान्येव न गच्छन्ति । किमुत मनः यदेवमामनन्ति–'मनसो वशे सर्वमिदं बभूव । नान्यस्य मनो वशमन्वियाय' इति । यद्वा नो मनः नापि मन. । "यतो वाचो निवर्तन्ते । अप्राप्य मनसा सह" इति प्रसिद्धाशक्तित्वात् । एषामिन्द्रियाणामाप्यायनेन प्राणस्य ज्ञानसाधनत्वम् । न च तदधीनस्वरूपप्रवृत्तिरयं तद्विषये चक्षुरादीनां असतीमवबोधनशक्तिमुत्पादयितुमलम् । इति पूर्वोक्तमिह किञ्चित्प्रपञ्चितम् ।

उत्तरार्धमवतारयति - तर्हीति । नान्तरित्यादि । ज्ञानार्थकधातुद्वयोपादानादिन्द्रियभेदः । विजानीम इत्युपसर्गेण वैशद्यावगमात् बहिरिन्द्रियकरणता । उत्तमपुरुषपरित्यागेन सर्वसाधारण्यमज्ञानस्य वक्तुं ज्ञेयमिति । एतत् यथा यादृशं तत् न विद्मो न विजानीम· । इतीत्यध्याहार्यम् । एवमुपदिशेदिति योजनीयमिति भाव. ।

३. 'न तत्र चक्षुरादिकं गच्छति । तथा सति एतद् ब्रह्म यथा येन प्रकारेण अनुशिष्यात् यः कश्चिदाचार्य उपदिशेत् तं प्रकारं न विद्मः सामान्यतोऽपि न जानीमहे न विजानीमः नैव तु विशेषतो जानीमः ।' इत्यपि योजना सम्भवति । निर्विण्णाय उपसन्नाय शिष्याय तदुपदेशः सर्वथा न शक्य इत्यापाततोऽपि कथनमनुचितमिति, अनुपदं स्वं प्रति स्वाचार्यैस्तदुपदेशः कृत इति वक्ष्यमाणतया तद्विरुद्धं सर्वथा उपदेशाशक्यत्वकथनमिति च मन्यमानेन तु योजनान्तरमाश्रितम् ॥ ३ ॥

४. नन्विति । अयं भावः । चक्षुरविषयत्वात् प्रत्यक्षं तावन्नास्ति । तत्प्रतिनियतस्य कस्यचिल्लिङ्गस्य प्रत्यक्षतोऽदर्शनादनुमानमपि नास्ति । वाक्श्रोत्राद्यविषयत्वात् शब्दप्रमाणसम्भवोऽपि निरस्तः । तथा च प्रमाणसामान्यविरहे तस्य शशशृङ्गायमाणतैव । एवं सति 'अनुशिष्यात्' इति तस्य य उपदेश उक्तः स कथं घटेत । न हि तुच्छं किमपि कश्चित् प्रेक्षावानुपदेष्टुं प्रवर्तेत श्रोता वा श्रोतुमिति । तेषामिति । अस्य वचमित्युत्तरत्रान्वयः । 'इति शुश्रुम' इति मन्त्रस्थस्य इतिशब्दस्य 'इतीमां वाचम्' इत्यर्थ इति भावः । सर्वात्मनेति । विदितादिति भूतकालप्रत्ययेन विदिक्रियायाः परिसमाप्तिद्योतनात् इतः परं वेदितव्यं किञ्चिदपि नावशिष्यत इति प्रतीयते । तेन सर्वात्मनेत्येतल्लाभः । अधीति । मन्त्र एतदश्रवणेऽपि एकवाक्योपादानन्यायेन समुच्चयप्रतीतिर्भवतीति भावः । सर्वात्मनेति । अविदितादिति निषेधः न कृत्स्नमित्यादिरर्थः,

नादिकञ्च न स्यादित्यत्राह—अन्यदेव तदिति । ये अस्माकं पूर्वे गुरवः ब्रह्म उपादिशन्, तेषां, 'सर्वात्मना विदितादपि विलक्षणम् । सर्वात्मना अविदितादपि विलक्षणम् । एवंरूपं ब्रह्म' इतीदृशीं वाचं वयं शुश्रुमेत्यर्थः ॥ ४ ॥

यद्वाचाऽनभ्युदितं येन वागभ्युद्यते ।
तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते ॥ ५ ॥
यन्मनसा न मनुते येनाहुर्मनो मतम् ।
तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते ॥ ६ ॥
यच्चक्षुषा न पश्यति येन चक्षूंषि पश्यति ।
तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते ॥ ७ ॥

अलक्ष्योऽपि तद्वक्षणादि निषेधति तथाऽलक्ष्योऽपि वेदनं निषेधतीति भावः । अविदितादपि तस्मादधिकम् । तत्र नान्तर्भवति । अतिरिक्तं अन्यद्विलक्षणमिति पर्यवसितम् । क्वचित्तु भेदनिर्देशादित्यत्र 'अधिकम् अर्थान्तरभूतं ब्रह्म' इति श्रीमद्भाष्यम् । इदमनादेयम् । श्रोत्रादिभिरप्रकाश्यं ब्रह्मेति ज्ञात्वाऽमृता भवन्तीति प्रथममन्त्रे उक्तम् । तैरज्ञातस्य ब्रह्मणः कथं ज्ञानम् । न हि धर्मिणि सर्वथाऽज्ञाते तस्य श्रोत्राद्यप्रकाश्यत्वरूपधर्मवत्तया ज्ञानं घटत इत्याशङ्कायां 'अस्ति ब्रह्म । तत्र मनसो नापि चक्षुरादेर्गोचरीभूत'मित्याचार्योपदेशात् तत्सम्भाव्यमिति पूर्वमन्त्रे उक्तम् । आचार्यस्यापि चक्षुराद्यगोचरत्वात् कथं तद्ज्ञानमिति शङ्कायां चक्षुरादिजनितविशदज्ञानविरहेऽपि उपदेशपरम्परया अविशदज्ञानं भवत्येवेत्यत्रोक्तमिति ॥ ४ ॥

५-९ एतदेवेति । अस्मदिन्द्रियागोचरत्वं उपदेशजन्याविशदज्ञानगोचरत्वमित्यर्थद्वयमुक्तम् । तदुभयं प्रपञ्चयतीत्यर्थः । तत्र एतत्खण्डशेषेण प्रथमस्य प्रपञ्चनम् । पञ्चानामपि मन्त्राणामर्थमाह वागादिभिरिति । अप्रकाश्यमिति । अनभ्युदितमिति भूतार्थवाचिना कर्मप्रत्ययेन वा, न मनुते न पश्यतीत्यादिवर्तमानार्थकर्तृप्रत्ययेन वा न कश्चिद् विशेषः । सर्वत्र तत्तद्व्यापारागोचरत्वं विवक्षितमिति भावः । इदमितीति । इदमः प्रत्यक्षगतमर्थः । न च कैश्चित् ब्रह्मेत्युपास्यमानं प्रत्यक्षदृश्यमस्ति । तस्मात् इतिशब्दमध्याहृत्य प्रकृतापेक्षिणः उक्तस्यायमर्थो वाच्य इति भावः । तद् ब्रह्मेति । नेदमित्यत्र इदंशब्दः यच्छब्दप्रतिनिर्देश इति भावः । नेत्यर्थ इति । इदं ब्रह्म न विद्धीति यद्यप्यनुषङ्गेण योजना भवति तथाऽपि अयमेवार्थः पर्यवसाने वाच्य इति भावः । वागादिभिरित्यादिपदसूचितं युगपन्मन्त्रस्वकव्याख्यानं विशदीकुर्वन्नाह एवमिति । चक्षुर्मन्त्रमात्रे वक्तव्यं वक्तुं प्रतीकं गृह्णाति यदिति । अत्र 'पश्यन्तीत्यर्थः' इत्येवं दृश्यमाने पाठे औचित्यं नास्ति । 'दृश्यन्ते' इति व्याख्यानान्तरे दृश्यते । तद्युक्तम् । पूर्वोत्तरेति । येन प्रयोजककर्त्रा हेतुना जनः चक्षूंषि स्वकीयानि पश्यति जानाति सङ्कल्प्य रूपग्रहणाय प्रेरयति इति कथञ्चिद् योजनसम्भवेऽपि पूर्वमन्त्रद्वये उत्तरमन्त्रद्वये च कर्मणि प्रयोगस्यैव दर्शनात् तदानुगुण्येन दृश्यन्त इत्येव युक्तमिति । प्राणमन्त्रमात्रे च वक्तव्यं किञ्चिदाह यदेति । 'प्रणीतमित्यर्थः' इति पाठो

यच्छ्रोत्रेण न शृणोति येन श्रोत्रमिदं श्रुतम् ।
तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते ॥ ८ ॥
यत्प्राणेन न प्राणिति येन प्राणः प्रणीयते ।
तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते ॥ ९ ॥

एतदेव प्रपञ्चयति—यद्वाचाऽनभ्युदितमिति । वागादिभिर्यदप्रकाश्यं स्वयं वागादीन्द्रियप्रकाशकं च यत् तदेव ब्रह्म जानीहि । यद्वस्तु इदमिति इदङ्कारगोचरतया हस्तामलकवत्सुविदिततया उपासते जनाः तद् ब्रह्म नेत्यर्थः । एवमुत्तरत्रापि ।

यच्चक्षुषेति । पश्यति पश्यन्तीत्यर्थः (१) । पूर्वोत्तरानुगुण्यात् ।

यत्प्राणेनेति । प्रणीयते प्रणीतमित्यर्थः (१) ॥ ५-९ ॥

इति प्रथमः खण्डः ।

दृश्यते । अत्र प्राणविशेषणत्वाल्लिङ्गमनुपपन्नमित्यसन्दिग्धम् । एवमर्थकरणे पूर्वानुगुण्यं हेतुतया विवक्षितमित्यप्यसन्दिग्धम् । मतं श्रुतमिति निष्ठान्ततया श्रवणात् अत्रापि तथात्वं पूर्वानुगुणमिति । एवं चेत् चक्षुर्मन्त्रभाष्ये 'दृष्टानीत्यर्थः' इति पाठेन भाव्यम् । न च येन वागभ्युद्यत इति आख्यातस्यैव श्रवणात् निष्ठानियमो नास्तीति वाच्यम् । वाङ्मन्त्रवर्जमेव तन्नियमात् । पञ्चसु हि मन्त्रेषु प्रथमपादे प्रथममन्त्रमात्रे अनभ्युदितमिति कर्मणि निष्ठा । अन्यत्र सर्वत्र मनुते पश्यति शृणोति प्राणिति इति कर्त्राख्यातम् । एवं द्वितीयपादेऽपि प्रथममन्त्रे अभ्युद्यत इति आख्यातम् । अन्यत्र सर्वत्र निष्ठेति नियम उचित इति । यद्वा पूर्वानुगुण्यं न निष्ठाविषयम् । अपितु प्रथमपादे यो धातुः प्रयुक्तः स एव द्वितीयपाद इति धातुविषयम् । अयं नियमः पूर्वेषु चतुर्ष्वपि मन्त्रेषु दृश्यते । अत्र पुन. प्रथमपादे प्राणितीति अनधातुः । द्वितीयपादे तु प्रणीयत इति धात्वन्तरं प्रयुक्तमिति तस्य नियमस्य भङ्गः । एतत्समाधित्सया किञ्चिदत्र भाष्यकृता विवक्षितमिति भाति । "प्राणित इत्यर्थः" इति पाठेन भाव्यम् । प्राणिति । अत्र णिचि प्राणयति : ततः कर्मयकि प्राण्यते । अत्र ररेणियामित्विक् स्थाने इयङ्करणे प्राणियते इति भवति । तत्र आकारस्य ह्रस्वः इकारस्य दीर्घश्च । राशिमिमं व्यत्ययं वृत्तानुरोधेन कृत्वा प्राण्यत इत्यस्य स्थाने प्रणीयत इति प्रयुक्तम् । न त्वत्र 'येन प्राणः प्रथमः प्रैति युक्तः' इति पूर्वोक्तानुगुणार्थत्वेऽपि 'णीञ् प्रापणे' इत्येव धातुः कर्मणि प्रयुक्त इति भावः ।

इदमत्राभिप्रेतम् । शब्दस्वरूपमात्रपरामर्शे यद्यप्येवमनियम इव सोऽपि च समाधेय इव भाति तथाप्यस्त्येव कश्चिदत्र वेदपुरुषस्याभिप्रायः । अनभ्युदितमिति पूर्वकालेऽभिवदनाभाव उक्तः । वर्तमानेऽपि स विवक्षित एव । मनुत इत्यादिना वर्तमाने मननाद्यभाव उच्यते । पूर्वकालेऽपि स विवक्षितः । न च एकत्र युगपत्कालद्वयबोधनं शक्यम् । तेन एकत्र भूतकालस्योक्तिः । अपरत्र वर्तमानस्य । उभयमुभयत्रोक्तं वेदितव्यम् । एवमनभ्युदितमिति कर्मप्राधान्यं तस्य स्वरूपतोऽभिवदनानर्हत्वख्यापनाय । न मनुत इति कर्तृप्राधान्यं अस्माकं

तन्मननशक्तिराहित्यख्यापनाय। इत्थमेव द्वितीयपादेऽपि अभ्युद्यते पश्यति प्राणायेति इत्यत्र मतं श्रुतमित्यत्र च वाक्यद्वयमनुसन्धेयम्। अत्र सर्वत्र कर्मप्राधान्यं सर्वथा तद्वशवर्तित्वख्यापनाय। येन चक्षूंषि पश्यतीति कर्तृप्रत्ययः प्रतीयमानं जीवस्येन्द्रियनियन्तृत्वमपि तदधीनमिति ख्यापनाय। प्रथमपादस्थेषु निषेधेषु क्वापि न बहुवचनं, इयति ब्रह्माण्डे यस्य कस्यापि पुरुषस्य या काचिदेकापीन्द्रियव्यक्तिर्न तत्प्रकाशनसमर्थेत्यभिप्रायेण। द्वितीयपादस्थेषु विधिषु चक्षूंषीति बहुवचनं सर्वत्र अन्वयार्हं कार्त्स्न्येन सर्वपुरुषसम्बन्धिनां सर्वेषामिन्द्रियाणां तदधीनत्वपरम्। एवमेव आहुरिति मनोमन्त्रमात्रे श्रुतमपि सर्वत्र सम्बन्धार्हं अत्रोच्यमानेऽर्थे सर्वेषामाचार्याणां सम्प्रतिपत्तिसूचकमिति। 'वागादिभिर्यदप्रकाश्यं स्वयं वागादीन्द्रियप्रकाशकं च यत् तदेव ब्रह्म जानीहि' इति परिमितगम्भीराणि भाष्यपदानि सर्वमिदमभिव्यञ्जयन्ति।

श्रोत्रस्य श्रोत्रमित्यत्र श्रोत्राद्यप्रकाश्यत्वं श्रोत्रादिप्रकाशकत्वं चाभिसंहितम्। तत्र अप्रकाश्यत्वमात्रं 'न तत्र चक्षु'रिति कण्ठोक्त्या स्फुटीकृतमिति तत्र किञ्चिदप्रपञ्चनम्। अत्र तु तदुभयस्यापि कण्ठोक्त्या स्फुटीकरणात् 'न चक्षुर्गच्छति। न वाग्गच्छति' इतिवत् चक्षुरादीनां कर्तृत्वमकृत्वा 'मनसा न मनुते। चक्षुषा न पश्यति' इति जीवं कर्तारं कृत्वा, यतमानोऽप्ययं न शक्नोति महीतुमिति ज्ञापनात् सम्यक् प्रपञ्चनम्।

तदेव ब्रह्मेति पर्याप्ते 'त्वं विद्धी'त्यभिप्रायविशेषगर्भम्। ब्रह्मणोऽतिवेदनेच्छया योऽनिभात्रं दिदृक्षोऽसि स त्वं तमशक्याभिनिवेशं मुञ्चेति। तदेवेत्येवकारस्य विवरणं नेदमित्यादि। 'अयमाचार्यो न तद्यथावद् वेत्ति। अन्ये केचन तदभिज्ञाः सन्ति। ते तदुपदेक्ष्यन्ती'ति त्वया न मन्तव्यमिति भावः। ननु सन्ति केचित् ये विदितं ब्रह्मेति वदन्ति। न ते वञ्चकाः। स्वयं तदुपासनात्। प्रतारका हि वाचा केवलं वदेयुः। न तु कर्मणा कुर्युः। ते तद्वक्ष्यन्तीति च न मन्तव्यम्। तेषामाप्तत्वेऽपि वस्तुस्वभावेन तद्ज्ञानासम्भवनिश्चयात्। विदितत्वाभिमानस्य भ्रान्तिमात्रमूलत्वादिति उपासिप्रयोगाभिप्रायः। उत्तरार्धस्य पञ्चकृत्वः पाठः 'श्रद्धत्स्व सोम्य' इत्यभिव्यञ्जनार्थः।

अत्र मनआदीना पञ्चानां मन्त्रभेदेन क्रमभेद एवं दृश्यते—

१.	मनः	प्राणः	वाक्	चक्षुः	श्रोत्रम्	१.	मन्त्रे
२.	श्रोत्रम्	मनः	वाक्	प्राणः	चक्षुः	२.	,,
३	चक्षुः	वाक्	मनः	—	—	३.	,,
४.	वाक्	मनः	चक्षुः	श्रोत्रम्	प्राणः	५-९.	,,

किमत्र किमपि नियामकमस्ति उत नेति युक्तमन्वेषणम्। विचारपरः शिष्यः तत्र करणतया प्राधान्यं कृत्वा मनसः प्रथमनिर्देशमकरोत्। उपसन्नेन शिष्येण गुरूपदिष्टस्यार्थस्य श्रोत्रेणैव ग्राह्यत्वात् गुरुरुत्तरारम्भे तदेव प्रधानीचकार। अनन्तरं चाक्षुषप्रत्यक्षमूलत्वात् सर्वेषां प्रमाणान्तराणां चक्षुःप्राधान्यम्। ततः परं 'इति शुश्रुम धीराणाम्' इति गुरूपदेशस्योपस्थितत्वात् वाक्प्रधानीकरणमिति शक्यं वक्तुम्। प्रधानाप्रधानभावानिश्चयं प्रत्यनन्युपयोगित्वेन तु ग्रन्थसंक्षेपपरैर्भाष्यकाद्भिरेवंविधेषु विषयेषु दृष्टिर्न दीयते। अत एव मन्त्रे त्वं विद्धीति प्रयुक्तस्यापि युष्मदोऽत्र अग्रहणमिति वेदितव्यम्।

इतिप्रथमखण्डविवरणा।

(२)

हरिः ओम् । यदि मन्यसे सुवेदेति दभ्रमेवापि नूनं त्वं वेत्थ
ब्रह्मणो रूपं यदस्य त्वं यदस्य देवेषु ।
अथ नु मीमांस्यमेव ते मन्ये विदितम् ॥ १ ॥

शिष्यं प्रत्याह—यदि मन्यस इति । अहं ब्रह्मस्वरूपं सुष्ठु वेद इति यदि मन्यसे न तत्तथा । अस्य ब्रह्मणः इह लोके यदपि रूपं त्वं वेत्थ तन्नूनं दभ्रमेवं अल्पमेव । देवेषु यद्रूपं त्वं वेत्थ तदपि । त्वया ज्ञातं सर्वं ब्रह्मणो रूपमल्पमेव । न सर्वं ब्रह्मरूपं त्वया ज्ञातम् । अतः परमेव ते विचार्यम् । नातः पूर्वं सम्यग्विचारितमित्यर्थः । एतद्वाक्यं श्रुत्वा सम्यग्विचार्य शिष्य आह—मन्ये विदितमिति । अहं विदितमेव मन्ये ॥ १ ॥

---

1. एवमिन्द्रियागोचरत्वं प्रदर्शितम् । अथेदानीं उपदेशाधीनकिञ्चिद्ज्ञानगोचरत्वं तादृशज्ञानस्वरूपनिरूपणेन प्रपञ्चयतीत्यभिप्रेत्य खण्डान्तरमवतारयति—शिष्यमिति । गुरुरेव भाषते । खण्डभेदात् अन्यः कश्चिदिति मतिर्न कार्येति भावः । ब्रह्मेति । ब्रह्मणो रूपमित्युपरिस्थितमन्त्रादाकृष्यते । सुवेदेत्यस्य कर्माकांक्षित्वात् । दभ्रमेवेत्यादिना वक्ष्यमाणस्य ज्ञातरूपाल्पत्वस्य यत्र हेतुत्वेनान्वयो वाच्यः तत्पूरयति न तत्तथेति । त्वम्पदद्वयं यत्पदद्वयं अस्यपदद्वयं चास्ति । तदत्र स्फुटप्रतिपत्त्यै वाक्यद्वयकल्पनमुचितम् । तत्र देवेष्विति द्वितीयवाक्यमात्रान्वयि । तत्स्थाने 'इह लोके' इति प्रथमवाक्येऽध्याहार्यम् । पदान्तराण्यावर्तनीयानीत्यभिप्रेत्य प्रथमवाक्यमन्वयक्रमेण दर्शयति - अस्येति । दभ्रमिति । ब्राह्मणे दहमिति पाठः । 'इमामगृभ्णन्' इत्यादाविव हकारस्थान एव भकारसत्त्वात् अर्थभेदो नास्ति । दहं दहरमित्यन्यत्र पठ्यते । तदपीति । 'नूनं दभ्रमेव' इत्यनुषज्य द्वितीयवाक्यमिह समाप्यते । वाक्यद्वयफलितमाह—त्वयेति । ततोऽपि पर्यवसितमाह—नेति । नु इति निरर्थम् । एवकारो भिन्नक्रमः । एतदर्थविवरण नात इति । विदितमेवेति । 'मन्ये' इति सावष्टम्भोक्तिलब्धमवधारणम् । आदौ मन्यस इति मन्यतिः शिष्यकर्तृकः प्रयुक्त इत्यत्रापि तत्कर्तृकत्वमुचितम् । उत्तमश्रवणाच्च शिष्यस्येयमुक्तिरिति भावः । अनन्तरमन्त्रेऽप्येवं द्रष्टव्यम् । "यदि मन्यसे सुवेदेति त्वं नूनं दभ्रमेव ब्रह्मणो रूपं वेत्थ" इति वाक्यसमाप्तिः । विशेषं कञ्चन वक्तुं उक्तमेवानूद्यते यदस्य त्वमित्यनेन वाक्येन । "अस्य ब्रह्मणो यद्रूपं त्वं मन्यसे सुवेदेति तन्नूनं दभ्रमेव वेत्थे"ति अपेक्षितपदानुषङ्गेण पूरणीयम् । वाक्यान्तरं यदस्य देवेष्विति । अस्य यद्रूपं देवेषु कश्चिन्मन्यते सुवेदेति सोऽपि तन्नूनं दभ्रमेव वेदेति अनुषङ्गेण यथोचितविपरिणामेन च योज्यम् । देवा अपि यदेतदल्पमेव विदुः किमु वक्तव्यं त्वमल्पमेव वेत्थेति । इति विशेष उक्तो भवति । इत्येवमपि व्याख्यानं कामं युक्तम् । अथापि 'यदि मन्यसे' इत्यत आरभ्य 'देवेषु' इत्येतदवधि अविच्छेदेन एकधा ब्राह्मणे पाठदर्शनात् भाष्ययोजनैव ज्यायसीति भाति ॥ १ ॥

नाहं मन्ये सुवेदेति नो न वेदेति वेद च ।
यो नस्तद्वेद तद्वेद नो न वेदेति वेद च ॥ २ ॥

कथमित्यत्राह—नाहं मन्य इति । अहं सम्यग्वेदेत्यपि न मन्ये । न वेदेत्यपि न । अपितु वेदैव । ततश्च कात्स्न्येनाज्ञातत्वञ्चास्ति । किञ्चिद्ज्ञातत्वमप्यस्तीत्यर्थः । यो नस्तद्वेदेति । नः अस्माकं ब्रह्मचारिणां मध्ये तत् 'नो न वेदेति वेद च' इति निर्दिष्टं तदर्थतत्त्वं यो वेद सः तद् ब्रह्म वेदेत्यर्थः ॥ २ ॥

यस्यामतं तस्य मतं मतं यस्य न वेद सः ।
अविज्ञातं विजानतां विज्ञातमविजानताम् ॥ ३ ॥

---

२. कथमिति । केन प्रकारेण विदितमित्यर्थः । आहेति । शिष्यः । पूर्वार्धे वाक्यत्रयम् । तत्र प्रथमपाद एकं वाक्यम् । 'नोनवेदेति' इति द्वितीयम् । तदाह नेति । मन्य इति शेषः । 'वेद च' इति तृतीयम् । तदाह अपित्विति । इदं पूर्वस्य भपिकारस्य अर्थलब्धम् । चकार एवार्थः । फलितमाह ततश्चेति । अन्यदेव तद्विदितादित्यादिना यदुपदिष्टं तत्सुगृहीतमिति भावः । ब्रह्मचारिणामिति । सब्रह्मचारिणामित्यन्यत्र पाठः । न परं अहं अपि तु मम सखायोऽपि भगवतोऽनुग्रहादिदं विदन्तीति शिष्यस्य विवक्षितम् । मध्ये तदिति । यदिति युक्तं पठितुम् । उत्तरत्र "निर्दिष्टमर्थतत्त्वम्" इति वा । "अस्माकं मध्ये यः तद् ब्रह्म वेद, स तद् ब्रह्म 'नो न वेद न वेदेति न' इति अनेन प्रकारेण वेद । ततः वेदैव" इत्यप्यत्र योजनं सुवचम् ॥ २ ॥

३. यस्येति । ननु कस्येदं वाक्यम्—गुरोः शिष्यस्य वा । नानयोरेकतरस्यापि । कस्य तर्हि । साक्षाद् वेदपुरुषस्य । कथम् । अन्यलिङ्गाभावे तस्य स्वतः प्राप्तेः । भाष्यकारस्य तु इदं स्पष्टमवदत् अयमभिप्रायो भवितुमर्हति । सर्वमिदं 'उपनिषदं भो ब्रूहि' इति चतुर्थखण्डे शिष्यवाक्यावधि आचार्यस्यैव वाक्यमिति युक्तम् । न च 'मन्ये विदितं, नाहं मन्ये' इत्याभ्यामाचार्यवाक्यप्रकरणविच्छेदः । अत्रोभयत्र मन्यते शिष्यकर्तृकत्वनिर्बन्धविरहात् । "यदि त्वं सुवेदेति मन्यसे त्वया विदितं तद् ब्रह्मरूपं वस्तुस्वरूपाऽल्पमेव । अतः ते विदितं वेदनं विदितत्वचनं वा मीमांस्यमेव विचार्यमेव अविश्वसनीयमेव मन्ये । अहं आचार्यपदे वर्तमानोऽपि सुवेदेति न मन्ये । आचार्याणामस्माकं मध्ये यस्तद् वेद सोऽन्योऽपि 'न वेदेति न' इत्येव तद्वेद ननु 'सुवेद' इति" इत्याचार्यवाक्यतयैव सुसङ्गतत्वात् । इति । वस्तुतस्तु ब्राह्मणे अत्र पाठः 'मन्येऽविदितम्' इति । तेन "विचार्यमेव तव यस्मात्तव अविदितं ब्रह्म अहं मन्ये" इत्याचार्यवाक्यतयैव योजना न्याय्या । "अथ ते अविदितं तत् मीमांस्यमेव मन्ये" इत्युपक्रमत एव वा एकवाक्यता । भवन्तः कथं मन्यन्त इति शिष्यस्य प्रश्नं सम्भाव्य आह नाहं मन्य इत्युत्तरमन्त्रसङ्गतिरतिशोभना ।

यस्यामतमिति । यः परिच्छिन्नत्वेन ब्रह्म न मनुते स ब्रह्म मनुते । यस्तु परिच्छिन्नत्वेन ब्रह्म मनुते स तु न जानातीत्यर्थः । अविज्ञातमिति । ब्रह्म एतावदिति परिच्छेदज्ञानवता ब्रह्म अविज्ञातं भवति । परिच्छिन्नत्वज्ञानशून्यानां ब्रह्म विज्ञातं भवतीत्यर्थः । उक्तञ्च भगवता भाष्यकृता—

> यतो वाचो निवर्तन्ते अप्राप्य मनसा सहेति ब्रह्मणोऽनन्तस्यापरिमित-गुणस्य वाङ्मनसयोरेतावदिति परिच्छेदायोग्यत्वश्रवणेन ब्रह्मैतावदिति परिच्छेदज्ञानवता ब्रह्माविज्ञातममतमित्युक्तम् । अपरिच्छिन्नत्वाद् ब्रह्मणः । अन्यथा'यस्यामतं तस्य मतम्' 'विज्ञातमविजानताम्' इति तत्रैव मतत्वविज्ञातत्ववचनं विरुध्येत ।

इति । ततश्चाविज्ञातत्वादिवचनं कार्त्स्न्येन ज्ञानाविषयत्वपरम् । न तु सर्वात्मना ज्ञानागोचरत्वपरमिति द्रष्टव्यम् । तथा हि सति 'ब्रह्मविदाप्नोति परम्' 'तमेव विदित्वाऽति मृत्युमेति' इत्यादिशास्त्राणामसङ्गतार्थत्वप्रसङ्गात् वेदान्तानां नैरर्थक्य-प्रसङ्गाच्च ॥ ३ ॥

यस्येति कर्तरि षष्ठी । यत्कर्तृकमननाविषयः तत्कर्तृकमननविषयः इति बाधितम् । तेन अमतमित्यत्र धात्वर्थे परिच्छिन्नत्वप्रकारकत्वं विशेषणं देयम् । तदाह य इत्यादि । मतं यस्ये-त्येतद् व्याचष्टे यस्त्विति । पूर्ववद् विरोधपरिहारायाह परीति । यद्यपि अहं ब्रह्म सुवेद । परि-पूर्णं ब्रह्म अहं मन्वे इत्येव अज्ञो मनुते न तु परिच्छिन्नं ब्रह्मेति तथापि मया वेदितुं मन्तुं शक्यमिति या तस्य मतिः सैव परिच्छिन्नत्वमतिरिति भाव.। एवमुत्तरत्र । अस्या उपनिषदो यः प्रधानप्रतिपाद्योऽर्थः कार्त्स्न्येन वेदितुमशक्यं ब्रह्मेत्येवंरूप एतन्मन्त्रद्वये स्पष्टतरमुक्तः तस्य शारीरके उद्धारं दर्शयति उक्तं चेति । अमतमित्युक्तमिति । 'न वेद सः' इति सामान्यवाच्यपि विद्धातुः प्रकरणान्मनने वर्तते । कर्तृत्वकारे सत्यपि पूर्वोत्तरानुगुण्यात् 'तस्याविदितं तस्यामतम्' इत्येव स्थितं वेदितव्यमित्यभिप्रायः । भाष्यग्रन्थस्य प्रकृते उपयोगमाह ततश्चेति । अविज्ञात-त्वादीत्यादिना अमतत्वग्रहणम् । असङ्गतेति । ब्रह्मकर्मकत्वस्य वेदनेऽभावादनन्वयोऽसङ्गतिः । वेदनाभावे तत्साध्यपरमपुरुषार्थालाभान्नैरर्थक्यम् ।

इति शुश्रुमेति प्राक्प्रस्तुतश्रवणात्मकज्ञानं सुवेदेत्येवंरूपं न भवति । न वेदेति नेत्येवं-रूपं तु भवति । इति पूर्वमन्त्रेणोक्तम् । अथ मनननिदिध्यासनात्मके अपि ज्ञाने तादृशे इत्यस्मिन् मन्त्रे उक्तमिति ज्ञेयम् ॥ ३ ॥

प्रतिबोधविदितं मतममृतत्वं हि विन्दते ।
आत्मना विन्दते वीर्यं विद्यया विन्दतेऽमृतम् ॥ ४ ॥

प्रतिबोधेति । प्रतिनियतो बोधः प्रतिबोधः । सत्यत्वज्ञानत्वानन्तत्वादिरूपासाधारणधर्मविशिष्टतया ज्ञातम् अमृतं ब्रह्मस्वरूपं तत्क्रतुन्यायेन स्वोपासकस्यापि अमृतत्वं विन्दते लम्भयतीत्यर्थः । अन्तर्भावितण्यर्थोऽयं विदिधातुः । लम्भनप्रकारमेवाह—आत्मना विन्दते वीर्यमिति । 'स नो देवः शुभया स्मृत्या संयुनक्तु' इत्युक्तरीत्या विद्यानिष्पत्त्यनुकूलं वीर्यं प्रसन्नेन परमात्मना लभते । प्रसन्नपरमात्माहितवीर्यार्जितया विद्ययाऽमृतत्वमश्नुत इत्यर्थः ॥ ४ ॥

---

४. एवं, अतिमुच्येति प्रस्तुतं इतिशुश्रुमेति परामृष्टं च अपरिच्छेद्यस्य ब्रह्मणो ज्ञानं प्रपञ्चितम् । एवंविधं ज्ञानं किं फलपर्यवसायिमिति शिष्यस्य शङ्कां शमयता यत्प्रागुक्तं 'अतिमुच्य धीराः' इति तदिदानीं विविच्यत इत्यभिप्रेत्य व्याचष्टे—प्रतिनियत इति । प्रतिनियतत्वं गुणविशेषवत्तयाऽवधारितत्वम् । तेन बोधेन विदितं विषयीकृतम् । तदाह सत्यत्वेति । 'वाङ्मनसाद्यपरिच्छेद्यतया अनन्तत्वरूप एको गुण उक्तः । तेन सत्यत्वज्ञानत्वानन्दत्वामलत्वान्यप्युपलक्षणीयानि । आनन्दाद्यधिकरणन्यायात् । मन्त्रे विदितमिति श्रवणमुक्तम् । मतमिति मननम् । उभयसङ्ग्रहो भाष्ये ज्ञातमिति । तत्क्रतुन्यायावकाशदानाय स्वयं विशिनष्टि अमृतमिति । स्वेति । षष्ठ्या अमृतत्वेऽन्वयः । लम्भयतीति । हिशब्दार्थोऽवधारणमप्यत्र द्रष्टव्यम् । विदीति । विद्लृ लाभ इत्यस्य इक्‌निर्देशः । यद्यपि, "प्रतिबोधविदितं उक्तरीत्या अपरिच्छेद्यतया श्रुतमेव मतं तथाऽनुमतमपि भवति । इदमुपलक्षणम् । विज्ञातमपि भवतीति । कात्स्न्येन श्रवणाद्यभावेऽपि उपायवैकल्यं नास्तीत्यर्थः । कुतः । यतः तावतैव अमृतत्वं विन्दते पुरुषः ।" इति योजने विन्दत इति यथाश्रुतमेवोपपद्यते । तथापि वाक्यभेदाध्याहारादिप्रसङ्गात् वरमयमेव प्रकार इति भावः ।

इत्युक्तेति । शुभयेति विद्यानिष्पत्त्यनुकूलत्वमुक्तम् । स्मृतिः सत्त्वहितपुरुषार्थविषया । अनया धृत्युत्साहादि उपलक्ष्यते । अयं तैत्तिरीयपाठः । बुध्येति तु श्वेताश्वतरे । तत्सर्वमिह वीर्यमित्युक्तम् । संयुनक्त्विति लोटाऽभिहिता प्रार्थना प्रार्थयित्रा ऽभिकाङ्क्षितं प्रणामार्चनादिभिराराधितस्य भगवतः प्रसादं व्यञ्जयति । तदाह प्रसन्नेनेति । प्रसन्नेति । प्रसादोपायो इत्यर्थः । आहितमुत्पादितम् । विद्यया उपासनात्मिकया । ऐन्द्रियकविशदज्ञानविरहेऽपि उपदेशाल्लब्धपरोक्षज्ञानमात्राश्रयेण शरणागतिवशीकृतभगवत्प्रसादेन अपेक्षितं सर्वं लब्ध्वा उपासनायां क्रियमाणायां तन्निष्पत्तौ वा अमृतत्वप्राप्तौ वा न मनागपि सन्देह इत्युक्तं भवति ॥ ४ ॥

इह चेदवेदीदथ सत्यमस्ति
न चेदिहावेदीन्महती विनष्टिः ।
भूतेषु भूतेषु विचित्य धीराः
प्रेत्यास्माल्लोकादमृता भवन्ति ॥ ५ ॥

तादृशब्रह्मज्ञाने त्वरामुत्पादयति——इह चेदवेदीदिति । इहैव जन्मनि ब्रह्म ज्ञातवांश्चेत् अथ समनन्तरमेव अस्ति सन् भवति सत्यः (—त्यम्) । ज्ञानाभावे आत्मनोऽसत्ता भवति । 'असन्नेव स भवति । असद् ब्रह्मेति वेद चेत् । अस्ति ब्रह्मेति चेद् वेद सन्तमेनं ततो विदुः' इति श्रुत्यनुरोधादिति द्रष्टव्यम् । भूतेषु भूतेषु सर्वभूतस्थं परमात्मानं प्रज्ञाशालिनः स्वेतरसमस्तविलक्षणत्वेन निर्धार्य अस्माल्लोकादर्चिरादिमार्गेण परमात्मानं प्राप्य मुक्ता भवन्तीत्यर्थः ॥ ५ ॥

इति द्वितीयः खण्डः

---

५. त्वरां विलम्बाक्षमत्वम् । आसक्त्यतिशयरूपां श्रद्धां वा । प्रकरणाल्लब्धं कर्मकारकमाह ब्रह्मेति । सत्य इत्यनन्वितोऽपपाठः । असत्तेति । अस्तिप्रतियोगित्वया निर्देशात् विनष्टिरित्य-सत्तोच्यत इति भावः । विचित्येत्यस्यापेक्षितं कर्म भूतेष्वित्यतः परं स्थितमिति पूरयित्वा ऽन्वयव्यमित्यभिप्रेत्याह सर्वेति । वीप्सार्थोऽयम् । प्रतिभूतं जीवस्यापि विद्यमानत्वादाह परमेति । प्राकरणिकस्य ब्रह्मणः भूतान्तर्वर्तित्वप्रतीतिपरत्वेन आत्मत्वेनोपस्थितिः । प्रज्ञेति । विचित्य धीरा इति श्रौतक्रमे सत्यपि विवेक एव धैर्यस्योपयोगादार्थं क्रममाश्रित्य प्रथमं धीरपदार्थ उक्तः । व्युत्पत्त्यात् चिती प्रज्ञाने इत्यस्माद्धातोर्ल्यपि विचित्येति रूपमित्यभिप्रायेण तदर्थमाह स्वेति । विविच्येति ब्राह्मणपाठः । शास्त्रान्तराधिकरणन्यायेनापेक्षितं सर्वमन्यतो ग्राह्यमित्याशयेनाह अर्चिरादिनेति । ब्रह्मणा ऐक्यं न मुक्तानामिति ज्ञापयन्नाह परमेति ।

कृत्स्नज्ञानं चेद् दुर्लभं किमल्पज्ञानेनेत्येवमौदासीन्ये असत्प्रायता भवेदित्यनेन प्रकारेण ब्रह्मज्ञाने त्वरा पूर्वार्धेनोत्पादिता । ब्रह्मस्वरूपादेरप्रत्यक्षत्वेऽपि प्रत्यक्षाद्यवगतसमस्तवस्तु-विलक्षणतया तद्ज्ञानं भवत्येवेति तादृशज्ञानेनैव मुक्तिरवश्यम्भाविनीति चानेन प्रकारेणोत्तरार्धेन ।

इति द्वितीयखण्डचिन्तना ।

(३)

हरिः ओम् । ब्रह्म ह देवेभ्यो विजिग्ये । तस्य ह ब्रह्मणो विजये
देवा अमहीयन्त । त ऐक्षन्तास्माकमेवायं विजयः ।
अस्माकमेवायं महिमेति ॥ १ ॥

आत्मना विन्दते वीर्यमित्युक्तार्थे आख्यायिकामाह—ब्रह्म ह देवेभ्यो विजिग्ये । परमात्मा देवानामनुग्रहार्थमसुरादीन् शत्रून् विजितवान् । तस्य हेति । ब्रह्मकर्तृकविजये सति देवाः पूजिता अभवन् । त ऐक्षन्तेति । देवाः अयमसुरविजयो ऽस्मत्कर्तृक एव तदनुकूलसामर्थ्यादिकमप्यस्मदीयमेवेत्यमन्यन्त ॥ १ ॥

तद्धैषां विजज्ञौ । तेभ्यो ह प्रादुर्बभूव ।
तन्न व्यजानन्त किमिदं यक्षमिति ॥ २ ॥

तद्धैषामिति । तादृशं तेषामभिमानं परमात्मा ज्ञातवानित्यर्थः । तेभ्यो हेति । तेषां देवानामनुग्रहार्थं तद् ब्रह्म यक्षरूपं प्रादुर्भूतम् । तन्नेति । एतद्यक्षस्वरूपं किमिति ते देवा न व्यजानन्त न ज्ञातवन्त इत्यर्थः ॥ २ ॥

तेऽग्निमब्रुवन् जातवेद एतद्विजानीहि किमेतद्यक्षमिति ।
तथेति ॥ ३ ॥

तदभ्यद्रवत् । तमभ्यवदत् कोऽसीति । अग्निर्वा अहमसीत्यब्रवीज्जातवेदा वा अहमसीति ॥ ४ ॥

---

१. आहेति । आचार्य. । विजिग्य इति । आचारमात्रत्वेन तैः कृतं किमपि दानं होमं वा परिपूर्णं स्वाराधनं मत्वा तान् निमित्तमात्रं कृत्वा इयमियतीति वक्तुमशक्यां महतीं चमूसेनां व्यजयत । तत्तु न कश्चिद् देवेष्वबुध्यत । तेन देवाः एव पूजिता । यथायथा पूजा अक्रियत तथातथा तेषामात्मनि बहुमानोऽवर्धत । पूजनाङ्गीकारो विकत्थनं च सर्वसमक्षमिति लिट्‌ोऽर्थः (?) स्पष्टार्थविवेकः । ऐक्षन्तेत्यस्य विवरणं भाष्येऽमन्यन्तेति ॥ १ ॥

२. मूले 'विजज्ञौ' 'प्रादुर्बभूव' । कश्चित् तद्वा इदं वा वेद । प्रादुरिति किमप्यग्रे ददृशे । भाष्ये अभिमानमिति । तदित्यनेन ऐक्षन्तेत्यस्यार्थः ईक्षणं परामृश्यते ईक्षणं च अभिमान एवेति भावः । परमात्मेति । पूर्वं ब्रह्म च प्रस्तुतम् । देवाश्च । तत्र देवानां एषामिति पृथगुपादानात् विजज्ञाविस्यत्र कर्तृ ब्रह्मैव । एकवचनाच्च तथेति ॥ २ ॥

३-४. त इति । भीत्युत्कम्पावसन्नसर्वगात्रा देवाः । जातवेद इति । जातं जातं वेद हि भवानिति स्तुतिः । विजानीहीति । अयमुपकारस्त्वयाऽस्माकं कर्तव्य इति परस्मैपदार्थः । यक्षम्

तेऽग्निमिति। जातवेद एतद्विजानीहि किमेतद्यक्षमितीत्युक्तवन्तः। तथेति तदभ्यद्रवदिति। तथेति स यक्षसमीपं गतः तेन कोऽसीति पृष्टः अग्निर्जातवेदा इति स्वस्य प्रसिद्धं नामद्वयमुक्तवानित्यर्थः॥ ३–४॥

तस्मिंस्त्वयि किं वीर्यमिति। अपीदं सर्वं दहेयं यदिदं पृथिव्यामिति॥ ५॥

तस्मिंस्त्वयीति। तव क सामर्थ्यमस्तीति यक्षेण पृष्टोऽग्निः पृथिव्यन्तर्वर्ति-सकलदाहसामर्थ्यमस्तीत्युक्तवान्॥ ५॥

तस्मै तृणं निदधावेतद् दहेति। तदुपप्रेयाय सर्वजवेन। तन्न शशाक दग्धुम्। स तत एव निववृते नैत(न)दशकं विज्ञातुं यदेतद्यक्षमिति॥ ६॥

अनिरूपितस्वरूपं अथापि बहुमन्तव्यं वस्तु। यक्ष पूजायामिति धातुः। तथेतीति। 'तथा' इत्यब्रवीदित्यर्थः। लोकोत्तरवीर्यवत्त्वाभिमानाभातहृदयतया वीतशङ्कं अनुपदं तेषामभ्यर्थ-नामङ्गीकृत्य आत्मानं बहुमन्यमान आसीत्। तदभ्यद्रवत्। स्वप्रार्थनाङ्गीकारप्रीतैस्तैरभिनन्दितः सादरसमीक्षितः शक्यं वेगमास्थाय अगच्छत्। तत्समीपं गत्वाऽपि पूर्वभाषणं आत्मनो गौरवहानिकरमिति मन्यमानः कार्यान्तरेणागत इव यदृच्छया सन्निहित इव च तूष्णीमतिष्ठत्। 'पूर्वभाषी च राघवः' इत्येवंविधगुणातिशयशालिना यक्षेण कोऽसीति पृष्टोऽपि अश्रुतवानि-वासीत्। तमभ्यवदत्। तथा स्थितं कथञ्चित् सान्त्वनेनाभिमुखीकृत्य अवदत् शान्तं मृदुना ध्वनिना। न तु अपृच्छत् प्रश्नोचितेन ध्वनिना। कोऽसि किन्नामासि। एवं यक्षेण प्रथमं वाचा कर्मणा वपुषा च सौजन्यमादरं च प्रदर्श्य पश्चान्मृदु नामज्ञापनमभ्यर्थितोऽग्निः अग्निर्वा अहमस्मि जातवेदा वा अहमस्मि होता वा अहमस्मि कविक्रतुर्वा अहमस्मीति प्रत्येकं 'वा अहमस्मि' घटयित्वा स्वकीयं महिमातिशयं प्रकाशयन्तीं दीर्घां नामावलिं अत्यन्ताविनयानादररूक्षं पपाठ। कस्त्वमसीति यक्षेण नोक्तम्–केवलं त्वङ्कारमेव न मर्षयेदिति विभ्यता। अग्नेस्तु न शङ्कालेशोऽपि अहमस्मीत्येतदाम्रेडयतः॥ ४॥

पुनर्यक्षस्य शान्तः सोपचारः प्रश्नः तस्मिन्निति। नामावलिव्यञ्जितसर्वातिशायिमहिम-शालिनि। तमभ्यवददिति पूर्वस्मादनुषङ्गः। अग्नेरुद्धतमुत्तरम्–अपीदमिति। इदं सर्वमपि; इदं दग्धुमशक्यमिति न किञ्चिद् वस्तु पृथिव्यामस्ति। इत्यब्रवीदित्यनुषङ्गः। "यदि ते मद्वीर्यपरीक्षायामिच्छाऽस्ति तर्हि ब्रूहि किं दहेयमिति" इत्यप्यत्र तेन व्यञ्जितम्॥ ५॥

६-१०. तृणं न महत् किमपि दारु। तदपि यथोपलब्धमेकं चिरावपतितं शुष्कं शीर्णं अविनष्ट-तृणत्वावस्थामात्रम्। तत् अग्निः इयाय ज्वालाशिखया पस्पर्श। प्रेयाय दीप्तां ज्वालां परितः

अथ वायुमब्रुवन् वायवेतद्विजानीहि किमेतद्यक्षमिति ।
तथेति ॥ ७ ॥

तदभ्यद्रवत् । तमभ्यवदत् कोऽसीति । वायुर्वा अहमस्मीत्य-
ब्रवीन्मातरिश्वा वा अहमस्मीति ॥ ८ ॥

तस्मिंस्त्वयि किं वीर्यमिति । अपीदं सर्वमाददीय(यं) य
दिदं पृथिव्यामिति ॥ ९ ॥

तस्मै तृणं निदधावेतदादत्स्वेति । तदुपप्रेयाय सर्वजवेन ।
तन्न शशाकादातुम् । स तत एव निववृते नैत(न)दशकं
विज्ञातुं यदेतद्यक्षमिति ॥ १० ॥

तस्मा इति । तर्हीदं तृणं दहेति यक्षेणोक्तः सर्वजवेन तत्समीपं गतः दग्धुमसमर्थो निवृत्त इत्यर्थः । उपप्रेयाय समीपं गत इत्यर्थः । नैतदशकं विज्ञातुं यदेतद्यक्षमिति । एवं देवान् प्रत्युक्तवानिति शेषः ॥ एवमुत्तरत्रापि ॥ ६–१० ॥

अथेन्द्रमब्रुवन् मघवन्नेतद्विजानीहि किमेतद्यक्षमिति ।
तथेति । तदभ्यद्रवत् । तस्मात् तिरोदधे ॥ ११ ॥

तस्मात् तिरोदधे । तस्मान्मघोनः सन्निधेः । एतस्य गर्वभङ्गो मा भूदिति तिरोहितमभवदित्यर्थः ॥ ११ ॥

प्रसारयामास । उपप्रेयाय सर्वजवेन सर्ववेगेन गत्वा स्वरूपेणैव तत् तृणमाचक्राम । तथापि तन्न शशाक दग्धुम् ।

निदधाविस्यादि परोक्षवृत्त्या ऽभिधानं देवस्याग्नेरियं परीक्षा तत्र मंगश्च न बहूनां विदितौ न च सर्वत्र प्रकाशनार्होमित्यभिप्रायेण । सः; तथा पराजित. प्रनष्टसर्वगर्वः । तत एव; तस्मात् प्रदेशादेव; न परं तृणात् यक्षाच्च । यद्वा निवृत्त एव; आहूतोऽपि न तस्थौ । तथा गाढनिविष्टोऽस्य हृदये परिभवशङ्कुः । निववृते; यथा यः कोऽपि न जानीयात् तथा चोरवन्नि-लीनः । चिरादग्निदम्य पृष्टो न्यवेदयत्—नैतदिति । यत् यत्स्वरूपस्वभावं तद् विज्ञातुं नाशकम् । इतीति । पूर्ववदवादीदिति नोच्यते । शोकाक्रान्तकण्ठो न किंचिद् वक्तुमक्षमत । अतिदीनस्वरः कथमपि तद् ज्ञापयामास । चेष्टयैव वा ॥ ९-१०

११. तस्मादिति । दूर एव स्थिते तस्मिन्निति भावः । तिरोदधे तस्याविदितमेव अतिशीघ्रम् । भाष्ये मा भूदिति । अन्यत्र तु "इन्द्रोपगमने यक्ष तिरोदध इत्यत्रायमभिप्रायः । इन्द्रो ह्यग्निवाय्वधिकतमोऽभिमानोऽस्य । 'सोऽहमग्न्यादिभि. प्राप्तं वाक्सम्भाषणमात्रमप्यनेन न प्राप्तोऽस्मी'त्यभिमाने कथं नाम भवादिति" इति ।

स तस्मिन्नेवाकाशे स्त्रियमाजगाम बहुशोभमानामुमां हैमवतीम्।
तां होवाच किमेतद्यक्षमिति ॥ १२ ॥

तस्मिन्नेवाकाश इति। तस्मिन्नेव प्रदेशे हिमवत्पुत्रीं बहुभिराभरणैः शोभमानां पार्वतीमिन्द्रानुग्रहाय प्रादुर्भूतां दृष्ट्वा तत्समीपमागत्य इयं सर्वं जानातीति मन्यमानः किमेतद्यक्षमिति पप्रच्छेत्यर्थः ॥ १२ ॥

इति तृतीयः खण्डः।

(४)

हरिः ओम्। सा ब्रह्मेति होवाच ब्रह्मणो वा एतद्विजये महीयध्वम्
(ध्वे) इति। ततो हैव विदाञ्चकार ब्रह्मेति ॥ १ ॥

सा ब्रह्मेति होवाचेति। ब्रह्मैव यक्षरूपेण युष्मन्मोहशमनाय प्रादुर्भूतम्। अतः(१) ब्रह्मसम्बन्धिनि विजये निमित्ते पूजां प्राप्नुत। अस्माभिरेव विजयः कृत इति दुरभिमानस्त्यक्तव्य इत्यर्थः। ततो हैवेति। तदुपदेशादेव ब्रह्मेति ज्ञातवानित्यर्थः ॥ १ ॥

---

१२. तस्मिन्नेव यत्र यक्षमासीत् तत्रैव। सम्यग्दर्शनयोग्यं समीपदेशमागत्य यदा यक्षाधिष्ठितं स्थलमपश्यत् तदा तत्र न यक्षमासीत्। अपि तु काचित् स्त्रीति भाव.। प्रथमं स्त्रीति ग्रहणम्। ततः करुणाशीतलस्वच्छाक्षशालिदिव्यरूपस्य। तत उमा हैमवतीति। तां होवाच। भक्त्या श्रद्धया च तां प्रणिपत्याभिवाद्य तयाऽनुमत उवाच। किमिति। किमस्य स्वरूपम्। किञ्चास्य अत्र प्रादुर्भावप्रयोजनमिति ॥ १२ ॥

इति तृतीयखण्डचिन्तना।

१. सा ब्रह्मेति। सेति ब्राह्मणे न पठ्यते। किंस्वरूपमित्यस्योत्तरं ब्रह्मेति। किं प्रादुर्भावप्रयोजनमित्यस्य ब्रह्मण इत्यादि। भवतां प्रतिबोधनमेव प्रयोजनमिति भावः। भाष्ये अत इति। अस्य अनन्तरवाक्यारम्भे अस्माभिरेवेत्यतः पूर्वं पाठ उचितः। प्राप्नुतेति लड्मध्यमबहुवचनम्। मूले अमहीयध्वमिति छेदः। महीयध्वमित्येव चेत् अडभावश्छान्दसः। ब्राह्मणे तु महीयध्वे इति लडेव श्रूयते। तदुपदेशादिति। तत इति नानन्तर्यमुच्यते। अपि तु 'सा उवाच' इत्युक्तं तस्या वचनमित्यभिप्रायः। यद्वाऽर्थलब्धोऽयमर्थः ॥ १ ॥

तस्माद्वा एते देवा अतितरामिवान्यान् देवान् यदग्निर्वायुरिन्द्रः।
ते ह्येनन्नेदिष्ठं पस्पृशुस्ते ह्येनत् प्रथमो विदाञ्चकार ब्रह्मेति ॥ २ ॥

तस्माद्वा इति। तस्मादेव हेतोः एत एवाग्निवाय्विन्द्रा इतरान् देवानतिशेरत इव। इवशब्द एवार्थः। अतिशेरत एवेत्यर्थः। यस्माद्धेतोः नेदिष्ठं समीपे वर्तमानं तद् ब्रह्म पस्पृशुः दृष्टवन्तः। यतश्च हेतोः प्रथमो विदाञ्चकार प्रथमं विदाञ्चक्रुरित्यर्थः ॥ २ ॥

तस्माद्वा इन्द्रोऽतितरामिवान्यान् देवान्। स ह्येनन्नेदिष्ठं
पस्पर्श स ह्येनत्प्रथमो विदाञ्चकार ब्रह्मेति ॥ ३ ॥

---

२. एत एवेति। 'एते' इत्येव किं पाठ इत्यन्वेष्टव्यम्। अतितरामित्यस्य पर्यवसितमर्थमाह—अतिशेरत इति। अतिरयं अतिक्रमणार्थः पूजार्थो वा कर्मप्रवचनीयः। तेनैव देवान्तरापेक्षयाऽऽधिक्यस्य प्रत्यायितत्वात् अनुवादमात्रं तरबिति भावः। अतिक्रमण एव वा कञ्चिदतिशयं बोधयति। यस्मादिति। हिशब्दार्थोऽयम्। प्रथममिति। उत्तानः शेत इत्यादाविव धात्वर्थकर्तरि प्राथम्य श्रूयते। तत्स्पष्टत्वाय एकवचनोपपत्तये च क्रियाविशेषणं कृतम्। चक्रुरिति। बहुषु व्यत्ययेनैकवचनमिति भावः। 'ते' इत्यस्य स्थाने स इत्यपि पठन्ति ॥ २ ॥

३. "ते ह्येनदिति बहुवचनानुरोधेन प्रथमे विदाञ्चक्रुरिति प्रयोक्तव्ये यद् व्यत्ययेन एकवचनं प्रयुक्तं तत्राभिप्रायविशेषं व्यञ्जयन्ती श्रुतिराह—तस्मादिति" इत्यभिप्रेत्य व्याचष्टे—अग्निवाय्विन्द्राणां मध्य इति। इतरदेवापेक्षया अग्निवाय्विन्द्रा अतिशयवन्त इति विवक्षितम्। तत्र द्वौ हेतू दर्शनरूपं स्पर्शनं, प्रबोधनं वेदनं च। तत्र स्पर्शनाधीनोऽतिशयः त्रयाणां समानः। तेन नेदिष्ठं पस्पृशुरिति युक्तम्। वेदनाधीनस्त्वतिशयो न तथा। पर्वतीमिक्वचात् प्रथममिन्द्रेणैव ब्रह्मविद्याया लब्धत्वात्। पश्चादिन्द्रादेव अग्निवायुभ्यां लब्धत्वात्। एवं विद्याधिगमप्राथम्यजनितस्यातिशयस्य त्रयाणां तुल्यत्वप्रतिपादने औचित्यविरहात् 'प्रथमो विदाञ्चकारे'त्येकवचनादर.—एककर्तृकमेव वेदनं मुखतः प्रतीयतामिति। न चैवं सति स इति कर्तृपदमप्येकवचनान्तमुपादेयम्। इतरदेवापेक्षया अग्निवाय्वोर्ब्रह्मज्ञानाधिगमप्राथम्यस्यापि प्रतिपिपादयिषितत्वात्। 'तस्माद्वा एते देवा अतितरामिवान्यान् देवा'निति तयोरपि तदर्थं इन्द्रसाधारण्येन प्रस्तुतत्वात्। तदयं महार्थव्यञ्जक- योऽपि वेदपुरुषस्य निपुणः प्रयोगविशेष इति। सर्वातिशायीति। अग्निवायुसहितसर्वदेवातिशायीत्यर्थः।

एवं बलवती जिज्ञासामुत्पाद्य विद्याविरोधिनमहङ्कारं विनिवर्त्य एषां पूर्वमेव प्रसन्नः परमात्मा स्वविषयां विद्यां सम्यगामकरोदित्यनयाऽऽख्यायिकया 'आत्मना विन्दते वीर्य'मित्युक्तोऽर्थ उपस्तम्भितः। उपदेशातिरिक्तप्रकारेण तदज्ञानं दुरधिगमम्। देवश्रेष्ठेष्वेव एवंविधेषु सत्सु कथमाशाल्पोऽपि मनुष्याणां कात्स्न्र्येन तद्वेदने इत्याद्यप्यत्र बोध्यम् ॥ ३ ॥

अग्निवाय्विन्द्राणां मध्ये यस्मादिन्द्रः सन्निहितं ब्रह्म दृष्टवान् सर्वेभ्यः पुरस्तात् पार्वतीमुखादिदं ब्रह्मेति ज्ञातवान् अतः सर्वातिशायीत्यर्थः ॥ ३ ॥

तस्यैष आदेशो यदेतद्विद्युतो व्यद्युतदा इति इन्न्यमीमिष-(न्यमिष)दा ३ इत्यधिदैवतम् ॥ ४ ॥

तस्यैष आदेश इति । तस्य विज्ञातस्य सद्यस्तिरोभूतस्य ब्रह्मणः य(१) एष आदेशः वक्ष्यमाण उपमानोपदेश इत्यर्थः । यदेतद्विद्युतो व्यद्युतदा इति । यथा विद्युतो विद्योतनं क्षणिकं तद्वदित्यर्थः । आ इति प्रसिद्धौ । उपमानान्तरमाह—इन्न्यमीमिषदा इति । अत्रापि आ इत्येतत् पूर्ववत् । इच्छब्द उपमानान्तर-समुच्चयार्थः । [1]यथा न्यमीमिषत् यथा निमेषप्रकाशतिरोभावः क्षणेन एवं ब्रह्मापि तिरोभूतमित्यर्थः । यथा विद्युतस्तिरोहिता भवन्तीत्यर्थः । न्यमीमिषदिति वचन-व्यत्ययश्छान्दसः । इत्यधिदैवतम् । अनात्मभूताकाशादिगतविद्युद्विषयं ब्रह्मण उप-मानदर्शनमुक्तमित्यर्थः ॥ ४ ॥

अथाध्यात्मम् । यदेतद् गच्छतीव च मनो न चैत-(मनोऽनेन चैन-)दुपस्मरत्यभीक्ष्णं सङ्कल्पः ॥ ५ ॥

---

४. विज्ञातस्य दृष्टस्य । य एष इति । य इत्यनन्वितम् । "यः एष वक्ष्यमाणः स आदेश उपमानोपदेश इत्यर्थः" इति वा पाठेन भाव्यम् । यत् एतत् उभयमपि क्रियाविशेषणम् । यत् व्यद्युतत् एष इति पूर्वेणान्वयः । गम्यं सादृश्यं स्फुटयति यथेति । प्रकाशे एकमुपमानम् तिरोभावेऽपरमित्यभिप्रेत्याह उपमानान्तरमिति । न्यमीमिषदिति । अत्रापि विद्युत एव कर्त्र्यः । अत्र पाठोऽन्वेषणीयः । छान्दस इति । व्यद्युतदित्यत्रापीदं द्रष्टव्यम् । विद्युतां वस्तुतो बहुत्वेऽपि द्योतने वा निमेषणे वा नैव कदाचिद् भेदो भासते । क्षणिकत्वादुभयोरपीति व्यञ्जनाय व्यत्यया-श्रयणमिति ॥ ४ ॥

५. एतद् ब्रह्मेति । यद्यपि पूर्ववत् क्रियाविशेषणमेतदिति युक्तम तथापि गच्छतेः कर्म-सापेक्षत्वादिदमेवात्र अन्वेतुमुचितमिति भावः । गच्छतीवेति । अचिरस्थायित्वात् दुर्निरूपं गच्छतीत्यर्थः । पूर्ववदर्थलभ्यं सादृश्यमाह ब्रह्मेति । अतः परं पाठान्वेषणं युक्तम् । यथेत्यादि अत्र असङ्गतमिव वक्ष्यमाणेन पुनरुक्तमिव च भाति । ननु सङ्कल्पविषयमेतद् भाति न मनो-

1. अत्र "यथा न्यमीमिषत् । यथा निमेषः प्रकाशतिरोभावः क्षणेन एवं ब्रह्मापि तिरोभूतमित्यर्थः । न्यमीमिषदिति वचनव्यत्ययश्छान्दसः । विद्युतस्तिरोहिता भवन्तीत्यर्थः" इत्येवंविधेन पाठान्तरेण भाव्यमिति भाति ।

अथाध्यात्ममिति । अनन्तरं देहस्थो दृष्टान्त उच्यत इत्यर्थः । यदेतदिति । एतद् ब्रह्म मनो गच्छतीव । ब्रह्मविषयकमनोगमनमिवेत्यर्थः । यथा मनसो ब्रह्मविषयीकरणं न चिरस्थायि एवमेव यक्षस्य ब्रह्मणः प्रकाशोऽपीत्यर्थः । मनसा ब्रह्मविषयीकरणं क्षणिकमेव न चिरानुवृत्तमिति दर्शयति "न चैतदुपस्मरत्यभीक्ष्णं सङ्कल्पः" । न हि मनोजनितसङ्कल्पः ध्यानविशेषः अभीक्ष्णं चिरम् एतद् ब्रह्म उपस्मरति । न विषयीकरोतीत्यर्थः । यथा ब्रह्मणो मनसा विषयीकरणं न चिरानुवृत्तम् एवं यक्षस्य प्रादुर्भावोऽपि न चिरानुवृत्तः । अत्र दृष्टान्तोक्तिव्याजेन ब्रह्मध्यानानुवृत्तिर्दुःशकेति दर्शितं भवति ॥ ५ ॥

तद्ध तद्वनं नाम । तद्वनमित्युपासितव्यम् । स य एतदेवं वेद अभि हैनं सर्वाणि भूतानि संवाञ्छन्ति ॥ ६ ॥

तद्ध तद्वनं नामेति । एतादृशमहिमविशिष्टं तद् ब्रह्म सर्वैरपि वनैः वननीयत्वेन प्रार्थनीयत्वेन वननामकं भवति । तस्मात् तद् ब्रह्म वनमित्युपासितव्यमित्यर्थः । वनत्वेनोपासनस्य फलमाह—स य एतदेवं वेदेति । सर्वैरपि प्रार्थनीयो भवतीत्यर्थः ॥ ६ ॥

विषयमिलाशङ्कां परिहरन् व्याचष्टे मनोजनितेति । अत्र 'न चैतत्' इत्यत्र 'अनेन चैतत्' इति पाठान्तरमन्यत्र दृश्यते ।

अत्रेति । अयं भावः । खण्डैक्यादाख्यायिकाशेषत्वं कृत्वा तस्यैव आदेश इत्यत्र 'तस्य दृष्टस्य सद्यस्तिरोभूतत्व' इति व्याख्याय अग्न्यादिदृष्टयक्षविषयतया इदं दृष्टान्तद्वयं योजितम् । सान्निध्यात्प्रबलेन प्रकरणेनोपस्थितं अत्रापि 'ब्रह्मेति होवाच' इति परामृष्टं ब्रह्मैव तच्छब्देन परामृश्य तस्य यत् पूर्वं 'यन्मनसा न मनुते' 'यस्यामतं तस्य मतम्' इति मनसोऽपि दुर्भेद्यत्वमुक्तं तदेव, यदपि उपदेशेन किञ्चिद् ज्ञानं जायते तदपि न चिरानुवृत्तध्यानपर्यवसायि भवतीत्यनेन प्रकारेण स्थिरीकर्तुमिदमुपमानद्वयमिति तु शक्यं युक्तं च वक्तुमिति ॥ ५ ॥

६. तद्ध ब्रह्म वनमिति । तद्वनमित्येकं पदमित्यन्ये । अन्यथाऽर्थोदं भवितुमर्हति । तदेतद्यक्षाभ्युक्तमित्यादौ तदेतदोरिवात्र तच्छब्दद्वयस्य योजयितुं शक्यत्वादित्यभिप्रायः । इत्यर्थ इति । एतावता तत्त्वमुपदिष्टम् । अथ हितमुपदिश्यत इति भावः । वनत्वेनेति । सत्यत्वज्ञानत्वादिभिः सर्वविद्यासाधारणैराकारैः क्रियमाणस्यास्योपासनस्य मोक्षफलत्वे स्थित एव एतद्विशेषगुणवतोऽस्य संयद्वामत्वादिविशिष्टस्येव आनुषङ्गिकं फलमाहेत्यर्थः । प्रार्थनीयः अनुरागविषयः, प्रियः ॥ ६ ॥

उपनिषदं भो ब्रूहीति । उक्ता त उपनिषत् । ब्राह्मीं वाव त उपनिषदमब्रूमेति ॥ ७ ॥

एवं 'आत्मना विन्दते वीर्यं'मित्यर्थे स्थिते सति वीर्यावाप्तिहेतुभूतभगवदनुग्रह-साधनप्रतिपादिकाम् उपनिषदं भो ब्रूहीति शिष्येणोक्त इतर आह—उक्ता त इति । ब्रह्मप्रतिपादिकां प्रधानोपनिषदमवोचाम । अतः प्रधानोपनिषदुक्तैव । साधनप्रति-पादिकां चोपनिषदं वक्ष्यामि यदि शुश्रूषस इति भावः ॥ ७ ॥

तस्यै तपो दमः कर्मेति प्रतिष्ठा । वेदाः सर्वाङ्गानि सत्य-मायतनम् ॥ ८ ॥

तस्यै तपो दमः कर्मेति प्रतिष्ठा । तस्यै उक्ताया उपनिषदे साधनभूतानि । कायशोषणलक्षणं तपः, इन्द्रियनिग्रहरूप उपशमः, अग्निहोत्रादिलक्षणं कर्म च उपनिषच्छब्दिताया ब्रह्मविद्यायाः प्रतिष्ठा दार्ढ्यहेतुः । वेदाः सर्वाङ्गानि सत्यमाय-तनम् । षडङ्गसहिताश्च वेदाः सत्यवचनञ्च ब्रह्मविद्योत्पत्तिकारणमित्यर्थः ॥ ८ ॥

---

७. शिष्यस्य जिज्ञासोत्थापकमर्थविशेषं दर्शयन्नाह एवमात्मनेति । वैषम्यनैर्घृण्यपरिहाराय साधनविशेषानुग्रहप्रीतेन परमात्मनेति वक्तव्यम् । तं साधनविशेषं ब्रूहीति प्रार्थयत इति भावः । शिष्येणोक्त इति सप्तमी प्रथमैव वा । ननु यदि भगवदनुग्रहसाधनविषयैव प्रार्थना कथं उक्ता त उपनिषदित्युत्तरमुक्तमित्याशङ्क्य तात्पर्यमाह ब्रह्मेति । यद्यप्ययं ब्रह्म साधनमेवोपदेष्टव्यं मन्यते तथाऽपि अत्र उपनिषद्व्यवहारं तदीयं पश्यन्तोऽन्ये श्रोतार एतदवधि वृत्त उपदेशो नोपनिषद्रूप इति भ्राम्येयुरिति मन्यमान आचार्यः पूर्वोक्ताप्युपनिषदेवेति ज्ञापयन् उक्तवक्ष्यमाणयो-रुपनिषदोर्विषयविवेकाय उक्ता ब्रह्मविषयेति 'ब्राह्मीं वाव ते' इत्येवमाहेति भावः । यदीति । असन्दिग्धे सन्दिग्धवद्वचनम् । शास्त्राणि चेत्प्रमाणं स्युरितिवत् । एत इत्यर्थे पर्यवसितम् ॥ ७ ॥

८. तस्यै । षष्ठ्यर्थे बहुलं छन्दसीति चतुर्थी । तस्याः । उपशम इति । इन्द्रियनिग्रहरूपो दम इति किं पाठ इति विमृश्यम् । दार्ढ्यं विषयान्तरप्रसङ्गानभिभाव्यत्वम् । वेदादीना-मेकवाक्योपादानेन समुच्चयोऽवगम्यते । तत्रातातिकोर्न तुल्यवत्समुच्चय इत्यभिप्रायेणाह—षडङ्ग-सहिताश्चेति । ननु उत्पत्तिहेतुः प्रथमं वाच्यः पश्चाद्दार्ढ्यहेतुः । सत्यम् । इह तु क्रियाकालेऽप्यनु-वर्तमानमुपकारकमन्तरङ्गं भवतीति दार्ढ्यहेतोः प्राथम्यम् । वेदास्तु प्रमाणतया प्रमामुत्पाद्य निवर्तन्त इति बहिरङ्गाः । नन्वेवं सति तेऽत्र न वक्तव्याः । सत्यं न वक्तव्याः । सत्यवचन-विधानार्थं तु उच्यन्ते । यथाऽनधीतवेदस्य ब्रह्मविद्यास्वरूपमेव दुर्लभं तथाऽसत्यवादिनः । तस्मात् सत्यमायतनं तस्याः । आयतनं यस्मिन्नायतते स्वरूपं लभते किञ्चित् । यस्मिन्नसति स्वरूपमेव नास्ति । तपआदिविरहे उत्पन्नापि विद्या दुर्बला भवेत् । अनृतवादे तु नैवोत्पद्यतेति सामान्यधर्मस्यापि सत्यवचनस्य ब्रह्मविद्यायामन्तरङ्गतरोपकारकत्वमिह विधित्सितमिति ॥ ८ ॥

यो वा एतामेवं वेदापहत्य पाप्मानमनन्ते स्वर्गे
लोके ज्येये प्रतितिष्ठति प्रतितिष्ठति ॥ ९ ॥

यो वा एतामेवं वेदेति । एतां ब्रह्मविद्याम् उक्तविधप्रतिष्ठायननोपेतां यो वेद स सर्वाणि पापानि विधूय कालपरिच्छेदशून्ये ज्येये ज्यायसि ज्येष्ठे सर्वोत्तरे स्वर्गलोके वैकुण्ठलोके प्रतिष्ठितो भवतीत्यर्थः । अनन्तज्येयपदसमभिव्याहारात् स्वर्गलोकशब्दो भगवल्लोकपरः ॥ ९ ॥

इति चतुर्थः खण्डः

क्षेमाय यः करुणया क्षितिनिर्जराणां भूमावजृम्भयत भाष्यसुधामुदारः ।
वामागमाध्वगवदावदतूलवातो रामानुजः स मुनिराद्रियतां मदुक्तिम् ॥

इति श्रीरङ्गरामानुजमुनिविरचितभाष्यसहिता
सामवेदीया तलवकारोपनिषदपराभिधाना केनोपनिषत् ।

---

१. तस्या इति पदेन परामृश्य उपनिषदेवेह एतच्छब्देन परामृश्यत इत्यभिप्रायेणाह—ब्रह्मविद्यामिति । एवमित्यस्यार्थमाह उक्तेति । असङ्कोचन्यायेन वक्ष्यमाणफलमहिम्ना च लब्धमाह-सर्वाणीति । 'अश्व इव रोमाणि' इति उपनिषदन्तरं स्मारयन्नाह—विधूयेति । अनन्तत्वस्यार्थमाह कालेति । लौकिकं रूपं दर्शयति—ज्यायसीति । प्रशस्यशब्दादीयसुनि 'ज्य च' इति सूत्रेण प्रकृतेर्ज्यादेशे 'ज्यादादीयसः' इति प्रत्ययादेरीकारस्य आकारादेशे 'ज्यायस्' इति रूपम् । अस्मिन्नाकारादेशे व्यत्ययेन अकृते अन्त्यलोपे च ज्येय इत्यकारान्तं रूपम् । तत्सप्तम्यन्तमिह श्रूयते । ईयसुन्-श्रवणेन एकस्मात् कस्माच्चिदयं ज्यायानिति न मन्तव्यमित्याशयेनाह ज्येष्ठ इति । ईयसुनस्तर्हि कथमुपपत्तिरित्यत्राह— सर्वेति । अस्माज्ज्यायानिति विशिष्यानभिधानात् असङ्कोचन्यायेन सर्वस्मादिति लभ्यत इति भावः । निरतिशयानन्दानुभवहेतुत्वादिदं सर्वोत्तरत्वम् । अन्तवदेव हि तद् भवति यदन्यत्र सुखम् । ननु स्वर्गः प्रसिद्ध इन्द्रलोकः । तत्कथमुच्यते वैकुण्ठ इति । अत्राह – अनन्तेति । आनन्दाद्यधिकरणन्यायाद् द्विर्भेदत्वमिति भावः । ऊर्ध्वदेशवर्तित्वेन वैकुण्ठोऽपि स्वर्ग इति ।

एतेन पुरुषार्थ इह दर्शितो भवति । यद्यपि वेदेति श्रवणजन्यमेव ज्ञानमुच्यते नोपासनम् । एतामिति कर्मत्वेन तस्य पृथगुक्तत्वात् । तच्च ज्ञानं एवंवेदेत्यनुनिष्ठम् । तथाऽपि फलस्वरूपपर्यालोचनेऽस्याक्षिमात्रगतत्वप्रतीतेः प्रजापतिवाक्य इव श्रद्धिफलमेव प्ररोचनार्थं अत्र उपचर्य कथञ्चित् स्वस्थाने पुरुषार्थोपदेशः कृत इति बोद्धव्यम् ।

इति परमखण्डचिन्तना.

केनोपनिषदः केन गृहीत इह दुर्ग्रहः । भावो भाष्यस्य चागाधो बलदत्त चालम् ॥

KENOPANISHAD

FIRST KHANDA

"I bow down to Raṅgarāmānuja Muni, by whom have been written the excellent commentaries on the Upaniṣads according to the school of Śrī Rāmānuja."

I. 1. KENEṢITAM PATATI PREṢITAM MANAḤ
KENA PRĀṆAḤ PRATHAMAḤ PRAITI YUKTAḤ
KENEṢITĀM VĀCAM IMĀM VADANTI
CAKṢUḤ ŚROTRAM KA U DEVO YUNAKTI.

By whom does mind being prompted grasp the desired (object) ?[1]
By whom impelled does the chief breath move about ?
By whom instigated is the speech spoken ?
And who indeed is the Lord who impels the eye (and) the ear ?

COMMENT :

"Let my añjali go to the Beauty (Lord) of Añjanādri[2], of the hue of *atasi*[3] flower-bunch, with His chest adorned with Lakṣmī."

1. In this verse we have no clear mention of the individual soul (jīva), since only the *karaṇas* are enumerated. Still the use of the word '*vadanti*' in the active plural intimates the fact that the questioner is aware of the finite souls which are unable to control or direct the movements of their *karaṇas* as such. Hence the mention of the *Ka u Deva*' or godhead whose knowledge is being sought by the disciple. The word *devāḥ* (plu.) is used sometimes to mean the sense-organs as in the *Pañcāgni-vidyā* (Ch. Up. V. 5. 2)

Madhva puts the question in the mouth of Rudra and the teacher addressed is taken to be Brahmā. The mention of some sensory and motor organs is to be taken to include all the others not mentioned. Further the names, mind, breath, eye, ear and speech are said to denote the *Devatās of* those sensory and motor organs. The Ultimate and Direct Lord of all is the Person or Godhead about whom this question is asked. This has obviously a reference to the Kena III and IV - the parable of Agni, Vāyu and Indra.

2. One of the seven Hills at Tirupati

3 *Atasi* is common flax which puts forth blue flowers.- Linseed oil is prepared from *atasi* seeds.

"Prostrating to Vyāsa, Rāmānuja and other teachers, I shall write this commentary on the Tālavakāropaniṣad."

In order to teach the nature of the Supreme Self by means of question and answer,[1] the topic is initiated here thus:

Keneṣitam...The intention is "By Whom being impelled does the mind go to its objects?"

Iṣitam: the desired, intended,

prathamah prāṇaḥ: the breath, the most important among the breaths,

Kena yuktaḥ: By whom impelled,

praiti: Moves about constantly,

And

Kena vā preṣitām: By whom verily instigated

imām vācam (avalambya): (resorting to) this speech-organ

vadanti (*lokāḥ*): (the people) speak

Cakṣuḥ etc. And who verily is the prompter of the eye and the ear?

Since these (sense-organs and the chief breath), being inanimate, cannot act without being impelled by the conscient (self), the disciple addresses this question to his Guru. This is the meaning.

The Teacher replies:

I 2. SROTRASYA SROTRAM MANASO MANO YAT
VĀCO HA VĀCAM SA U PRĀNASYA PRĀṆAH
CAKSUSAŚ CAKSUR ATIMUCYA DHĪRĀH
PRETYĀSMĀL LOKĀD AMRTĀ BHAVANTI

That which is the Ear of the ear, Mind of the mind,
Indeed the Speech of the speech, that is the Breath of the breath,
the Eye of the eye; on knowing (that) the seers
become immortal departing from this world.

1. This avatārika or introduction is for all the verses spoken by the Guru from Kena I 2 to '*Mīmāmsyam eva te*' II. 1.

Yat: It is that alone which is the revealer of the eye etc., and which the eye etc., cannot reveal and that whose existence (*prāṇanam*) is not dependent upon breath.

iti evem atimucya: Knowing this (truth)

asmāt lokāt: from this world

pretya: passing through the path of the Arcis etc.,

amṛtā bhavanti: (they) become freed. This is the sense. This same is further expatiated:

I, 3. NA TATRA CAKṢUR GACCHATI NA VĀG GACCHATI NO MANAH
NA VIDMŌ NA VIJĀNĪMO YATHAITAD ANUSIṢYĀT

There the eye does not go,
Speech does not go, nor the mind:

Then how is this to be taught? the reply is

"We know it not (through the inner organ): nor know it (through outer organs). thus should one teach this".

A teacher asked as to what it is, should teach that it (self) is knowable neither through the inner nor through the outer organs.

If that is Unknowable altogether, will not it become a non-entity *(tuccha)*? And further it may result that one need not go to a teacher seeking to be taught knowledge of Brahman (that cannot be taught). The answer is as follows:

I, 4. ANYAD EVA TAD VIDITĀD ATHO AVIDITĀD ADHI
ITI ŚUŚRUMA PŪRVEṢĀM YE NAṢ TAD VYĀCACAKṢIRE

It is quite different from the known:
Also above the unknown;
Thus have we heard from those Ancients
Who explained that to us.

Ye: We have heard from those ancient teachers of ours who taught us the Brahman, these words that 'It is different from that which they fully knew and different from that which

they altogether knew not, and that Brahman is of such a nature.' This is the meaning.[1]

This is further elaborated :

I. 5. YAD VĀCĀ' NABHYUDITAM
YENA VĀG ABHYUDYATE
TAD EVA BRAHMA TVAM VIDDHI
NEDAM YAD IDAM UPĀSATE

That which is not told by speech
By Which the speech is spoken
That alone know thou as Brahman
Not that which (people) worship as ' this '.

I. 6. YAN MANASĀ NA MANUTE
YENĀHUR MANO MATAM
TAD EVA BRAHMA TVAM VIDDHI
NEDAM YAD IDAM UPĀSATE.

That which (one) thinks not with mind
By Which (they) say the mind is thought
That alone know thou as Brahman
Not that which (people) worship as ' this '.

I. 7. YAC CAKṢUSĀ NA PAŚYATI
YENA CAKSŪMṢI PASYATI
TAD EVA BRAHMA TVAM VIDDHI
NEDAM YAD IDAM UPĀSATE.

1 Kena I. 4 This shows that instruction is the means for knowing Him. Saṅkara takes the view that *nirguna* Brahman is instructed here.

Tat viditāt anyad eva hi Viditam nāma yat vidi-kriyayā atiśayena āptam. Tat vidikriyākarmabhūtam kvacit kiñcit kasyacit viditam syāt iti sarvameva vyākṛtam viditam eva. Tat tasmāt anyat ityarthaḥ

Aviditam ajñātam tarhi iti prāpte āha. Atho aviditāt vidita-viparītāt avyākṛtāt avidyālaksanāt vyākṛtabījāt. Adhīti uparyarthe lakṣaṇayā anyad ityarthaḥ... Yad viditam tad alpam martyam duḥkhātmakam ceti heyam. Tasmāt viditāt anyat Brahma ityukte tu aheyatvam uktam syāt. Tathā aviditāt adhītyukte anupādeyatvam uktam syāt Kāryārtham hi kāraṇam anyat anyena upadīyate. Ataśca na vedituḥ anyasmai prayojanāya anyat upādeyam bhavati. Ityevam viditāviditābhyām anyad iti heyopādeyapratisedhena svātmano' nyabrahmavisaya-jijñāsā śisyasya nivartitā syāt Na hi anyasya svātmanaḥ viditāviditābhyām anyatvam vastunaḥ sambhavatīti ātmā Brahma ityeṣa vākyārthaḥ

That which (one) sees not with the eye
By Which the eyes see
That alone know thou as Brahman
Not that which (people) worship as 'this'.

I 8. YAT SROTREṆA NA ŚṚṆOTI
YENA ŚROTRAM IDAM ŚRUTAM
TAD EVA BRAHMA TVAM VIDDHI
NEDAM YAD IDAM UPĀSATE

That which one hears not through the ear
By Which this ear is heard
That alone know thou as Brahman
Not that which (people) worship as 'this'

I. 9. YAT PRĀṆENA NA PRĀṆITI
YENA PRĀṆAH PRAṆIYATE
TAD EVA BRAHMA TVAM VIDDHI
NEDAM YAD IDAM UPĀSATE

That which does not exist through prāṇa
By Which prāṇa is made to exist
That alone know thou as Brahman
Not that which (people) worship as 'this'.

Know thou that alone is Brahman which is impossible of revealment by speech etc, and that which reveals speech and the sense-organs. The meaning is That thing which people worship as if it is fully known as 'this', like the gooseberry in the palm (of one's hand) is not Brahman.

This is the interpretation to be adopted in the following mantras (also).

yaccakṣuṣā paśyati : sees : the meaning is 'see',[1] because of parity with that which preceded and with that which follows[2]

Yat prāṇena praṇiyate : was made to exist is the meaning.

END OF THE FIRST KHANDA

---

1. *upāsate* being plural the commentator interprets 'paśyati' as 'paśyanti'. vide sanskrit notes

2. *praṇitam ityarthaḥ* is the reading found in the Tel. ed 1869. & N ed. grantha. The reading obviously should be *prāṇita ityarthaḥ*.

SECOND KHANDA

The teacher addresses the disciple: "If you think I know well the form of Brāhman, it is not so".

II, 1. YADI MANYASE SUVEDETI DABHRAM EVĀPI
NŪNAM TVAM VETTHA BRAHMAṆO RŪPAM
YAD ASYA TVAM YAD ASYA DEVEṢU. ATHA
NU MĪMĀMSYAM EVA TE MANYE VIDITAM.

If you think 'I know (It) well', indeed what form of this Brahman you know (in this world) (and) what form (of this Brahman) you know in gods is verily very slight. Now then it is yet to be investigated. I think (It is) known (to me).

Of this Brahman what form you know in this world that indeed is very slight.

Dabhram : alpam : very slight.

And what form you know in gods that form of Brahman known to you also is very little. Not all the form of Brahman is known to you. Only hereafter it is to be investigated. Till now it was not fully discussed. This is the meaning.

Hearing this statement and having fully investigated, the pupil says. *Manye viditam* :[1] I think It is known to me. I think It known alone.

(The Teacher) How ?

(The pupil replies)

1. It is interpreted as one sentence or as the speech of the teacher himself by HANS OERTEL in his edition and translation of the *Jaiminiya Upānisad Brāhmana* (JAOS XVI. 1. p 216) cf. *Thirteen Principal Upanishads.* HUME, Footnote 3 on p. 336 According to Śankara and Rangarāmānuja the last two words and the following verse are put into the mouth of the pupil When '*manye viditam*' are the words of the teacher alone, it follows that the passage is spoken by the teacher himself Even though Śankara and RR. place these two words and the stanza following it in the mouth of the pupil, both of them place the subsequent stanzas in the mouth of the Veda Puruṣa.

II. 2. NĀHAM MANYE SUVEDETI NO NA VEDETI VEDA CA
YO NAS TAD VEDA TAD VEDA NO NA VEDETI VEDA CA

I do not think I know It well
Nor that I do not know, and I know.
Whoever amongst us knows that which was referred to as 'Nor that I do not know and I know' knows that.

I do not think that I know it fully nor even that I do not know. The meaning is that it is not completely known but that some knowledge of it is had.

yo nas tad veda... he who amongst us, students, knows that thing which was referred to as "*No na vedeti veda ca*" knows that Brahman, is the meaning.

II. 3. YASYĀMATAM TASYA MATAM MATAM YASYA NA VEDA SAH
AVIJÑĀTAM VIJĀNATĀM VIJÑĀTAM AVIJĀNATĀM

Who thinks It is not thought of, by him It is thought of.
Who thinks It is thought of, he does not know (It).
It is not known by those who (think they) know.
It is known by those who (think they) do not know.

yasyāmatam: He who does not think of Brahman as limited he knows Brahman. But he who thinks of Brahman as limited he does not know: this is the meaning.

Avijñātam... To those who have the knowledge of Brahman limited-as-this-much, Brahman is unknown. To those who have not this knowledge of Brahman limited-as this-much, Brahman is known. This is the meaning.

This is stated by the great *Bhāsyakāra* (Śrī Rāmānuja): "Since the scripture 'From Which speech returns together with the mind not attaining (It)' teaches the Brahman as the limitless and as possessing countless qualities, as one that is incapable of being apprehended as limited in any manner, it is said that to those who know Brahman limited-as-this-much, Brahman is unknown and unthinkable because Brahman is limitless. Otherwise the statement regarding its being thought of and cognized 'By him who thinks It is not thought of It is

thought of; It is not known by those who (think they) know' gets contradicted."[1] (*Śrī-Bhāṣya*. I. I. 1).

Now therefore the statement regarding Its not being cognized has reference to Its being beyond fullest comprehension, and not to Its being completely beyond comprehension. This can be seen. If this be so the consequence will be that the texts "The knower of Brahman attains the Transcendent" (*Tait.* Up. II. 1.) "Knowing Him thus one transcends death", will have no meaning, and these Vedānta texts can have no purpose.

II 4. PRATIBODHAVIDITAM MATAM AMṚTATVAM HI VINDATE ĀTMANĀ VINDATE VĪRYAM VIDYAYĀ VINDATE 'MṚTAM

(The Immortal) definitely comprehended
makes one attain verily immortality.
Through the Self (one) attains strength
(and) through knowledge (one) attains the Immortal.

Pratibodha means definite comprehension. The nature of the Brahman, the Immortal, known as possessing the distinctive qualities of truth, knowledge, infinity and etc., brings immortality to its worshipper according to the principle of *Tat Kratu* (*Ch.* Up. III. 14. 1). The root *vid* here implies the causal (*antar-bhavita-ṇyarthah*).

The manner in which one is made to attain (the Immortal) is next spoken of: *Ātmanā*......

In the manner spoken of in the text "Let that God cause us to come into contact with good remembrances" (Tait. Nār.), one attains strength conducive to the accomplishment of knowledge through the Supreme Self Who is pleased. The meaning is that one attains immortality through knowledge that is obtained through the strength granted by the Supreme Self through His Grace.

The teacher imparts the urgency of such knowledge of Brahman :—

1. p. 55. *Ananda Press* ed.

II. 5. IHA CED AVEDĪD ATHA SATYAM ASTI
NA CED IHĀVEDĪN MAHATĪ VINAṢṬIH
BHŪTEṢU BHŪTEṢU VICITYA DHĪRĀH
PRETYĀSMALLOKĀD AMṚTĀ BHAVANTI.

If (one) in this (very birth) has known the truth
then (one) is. If (one) in this (very birth) has not known (It(
(then) great is the destruction.
In each and every being having found (It) the seers
on departing from this world become immortal.

If in this very birth one has known the Brahman only then does one live. In the absence of knowledge of this truth (Brahman), non-existence happens to the soul.[1] Since this follows from the text "Non-existent indeed is one if one knows not Brahman. If one knows that there is Brahman (then) they consider that one as existent." (*Tait.* Up. II. 5) This can be seen.

bhūteṣu bhūteṣu: The Wise having determined the Supreme Self that is in all beings as different from all others, attaining the Supreme Self through the path of the *Arciṣ* etc., on departing from the world, become Immortal. This is the meaning.

END OF THE SECOND KHANDA.

THIRD KHANDA

With reference to what was intimated in the passage "One attains strength through the Self", the teacher narrates a story.

III. 1. BRAHMA HA DEVEBHYO VIJIGYE. TASYA
HA BRAHMAṆO VIJAYE DEVĀ AMAHĪYANTA.
TA AIKṢANTĀSMĀKAM EVĀYAM VIJAYAH.
ASMĀKĀMEVĀYAM MAHIMETI.

1. The text in all editions runs: *san bhavati satyaḥ. Jñānābhāve.........*: The reading should be: *san bhavati.*

Brahman it is said won (a victory) for the gods. At the victory of that Brahman the gods were adored. They thought that the victory was their's alone (and) that power was their's alone.

The highest Self in order to help the devas (gods) overcame their foes, the asuras etc. When there was the victory by the Brahman, the gods were honoured. The gods thought that the victory over the asuras was their own deed and that the power etc., needed for it was their's.

III. 2 TADDHAIṢĀM VIJAJÑAU. TEBHYO HA PRĀDURBABHŪVA. TANNA VYAJĀNATA KIM IDAM YAKṢAM ITI.

It (Brahman) knew (of that) of them: (It) manifested (Itself) to them. They knew It not: "What wonderful being is It?"

The meaning is that God became aware of this their vanity. In order to favour those gods, that Brahman manifested Itself in the form of a *Yakṣa* (Wonderful Being)[1] "What the nature of this Yakṣa is:" this the gods did not know.

na vyajānanta: did not know is the meaning.

III 3 TE 'GNIM ABRUVAN JĀTAVEDA ETAD VIJĀNĪHI KIM ETAD YAKṢAM ITI TATHETI.

They (the gods) said to Agni "O Jātavedas! (Thou who knowest all the beings born) find out what this Yakṣa is?" He said "Yes".

III 4. TAD ABHYADRAVAT. TAM ABHYAVADAT KO SĪTI AGNIR VĀ AHAM ASMĪTYABRAVIJ JĀTAVEDĀ VĀ AHAM ASMĪTI.

He ran to It. It spoke to him "Who art thou?". He replied "I am indeed Agni. I am verily Jātavedas (the knower of all beings born)"

Te agnim...They said "O Jātavedas! Find out as to what this Yakṣa is." Consenting he went near that Yaksa. Being

1. cf. Ṛg Veda VII 88 6. where this name is applied to Varuṇa Māyin is the meaning of Ṛg Veda X. 88. 13 (Yaksasyādhiyaksām);

questioned as to who he was he mentioned his two widely-known names Agni and Jātavedas.

III. 5. TASMIṀSTVAYI KIM VĪRYAM ITI. APĪDAM SARVAM DAHEYAM YAD IDAM PṚTHIVYĀM ITI.

III. 6. TASMAI TṚṆAM; NIDADHĀVETAD DAHETI. TAD UPAPREYĀYA SARVAJAVENA. TANNASASĀKA DAGDHUM. SA TATA EVA NIVAVṚTE NAITAD ASAKAM VIJÑĀTUM YAD ETAD YAKṢAM ITI.

"In thee of such (greatness) what strength is there?" It asked. (Agni replied). "Whatever is on this earth all that I can burn." It cast towards him a blade of grass saying 'Burn this.' (He) rushed up to it with all speed. (He) was not able to burn (it). He withdrew from It saying "I could not find out what this Yakṣa is."

Agni being questioned by the Yakṣa "In what lies your skill?" replied "I have the ability to burn all that is on the earth."

"If so burn this blade of grass" spoken to thus by the Yakṣa, (Agni) approaching it with all speed withrew unable to burn it. This is the meaning.

upapreyāya: went near is the meaning.

"I could not find out who this Yakṣa is": thus (He) spoke to the gods, is to be added.

III. 7. ATHA VĀYUM ABRUVAN VĀYAVETAD VIJĀNĪHI KIM ETAD YAKṢAM ITI. TATHETI.

III. 8. TAD ABHYADRAVAT TAM ABHYAVADAT KO'SĪTI. VĀYUR VĀ AHAM ASMĪ TYABRAVĪN MĀTARIŚVĀ VA AHAM ASMĪTI

III. 9. TASMIṀSTVAYI KIM VĪRYAM ITI. APĪDAM SARVAM ĀDADĪYAM YAD IDAM PṚTHIVYĀM ITI

III. 10. TASMAI TṚṆAM NIDADHĀVETAD ĀDATASVETI. TAD UPAPREYĀYA SARVAJAVENA. TANNA SAŚĀKĀDĀTUM. SA TATA EVA NIVAVṚTE NAITAD AŚAKAM VIJÑĀTUM YAD ETAD YAKṢAM ITI.

Then they told Vāyu "O Vāyu! Find out who this Yaksa is!" He said "Yes."

He ran up to It. It spoke to him "Who art thou?" He said "I am indeed Vāyu. I am verily Mātariśvan."

"In thee of such (greatness) what strength is there?" "Whatever is on this earth all that I can carry off."

It cast a blade of grass towards him saying "Carry this off." (He) rushed up to it with all speed. He could not carry it off. He withdrew from it saying "I could not find out what this Yaksa is."

III. 11. ATHENDRAM ABRUVAN MAGHAVANNETAD VIJĀNĪHI KIM ETAD YAKSAMITI. TATHETI. TAD ABHYADRAVAT. TASMĀT TIRODADHE.

Then they said to Indra "O Maghavan! Find out what this Yakṣa is." "Yes," he said. He ran up to it. It disappeared from him.

Tasmāt : from his vicinity. The meaning is that it became invisible, so that there might not be any humiliation (to him) (*garvabhanga*).

III. 12. SA TASMINNAIVĀ'KĀŚE STRIYAM ĀJAGĀMA BAHUSOBHAMĀNĀM UMĀM HAIMAVATĪM. TĀM HOVĀCA KIM ETAD YAKṢAM ITI

He at the same place came near a lady, very effulgent, Umā Haimavatī (daughter of Himavat). He asked her "What is this Yakṣa?"

In that same place Indra seeing Pārvatī, the daughter of Himavat, radiant with many ornaments, who manifested herself out of grace to Indra, approaching her with the idea that she knew everything questioned her "What is this Yakṣa?".

END OF THE THIRD KHANDA

FOURTH KHANDA

IV. 1. SĀ BRAHMETI HOVĀCA BRAHMAṆO VĀ ETAD VIJAYE MAHĪYADHVAM ITI. TATO HAIVA VIDĀÑCAKĀRA BRAHMETI.

She said "(This is) The Brahman. You are thus honoured at the victory of Brahman." Then he knew that (It was) Brahman.

The very Brahman manifested Itself in the yakṣa-form to remove your delusion. On account of the Victory which belongs to Brahman you are being honoured. Therefore [1]the conceit that "We ourselves achieved this Victory" must be abandoned. This is the meaning.

Tato ha: That It was Brahman he knew due only to Her instruction is the Meaning.

IV. 2. TASMĀD VĀ ETE DEVĀ ATITARĀM IVĀNYĀN DEVĀN YADAGNIR VĀYUR INDRAH. TE HYENAN NEDIṢṬHAM PASPṚŚUS TE HYENAT PRATHAMO VIDĀÑCAKĀRA[2] BRAHMETI.

Indeed therefore these gods, Agni, Vāyu, and Indra, are superior to all the other gods. Since they had the closest contact with It, and since they first knew that It was Brahman.

Due to this very cause these Agni, Vāyu and Indra alone are verily superior to all the others.

iva means *eva*, only. Verily superior is the meaning.

hi: because

nediṣṭham: The Brahman that was near.

paspṛśuḥ: had seen.

1. The *ataḥ* in the place at which it appears in the text of the commentary is not appropriate. Instead it has to be transferred to the beginning of the next sentence.

2. The subject is in the plural whereas the verb is in the singular. This unique usage is adopted perhaps to reveal that whilst all the three gods saw the Brahman, only one of them, Indra, knew him as the God from *Umā*, the other two and the rest having come to know It as such from *Indra*.

VI. 6. TADDHA TADVANAM NĀMA TADVANAM ITYUPĀSITAVYAM. SA YA ETAD EVAM VEDĀBHI HAINAM SARVĀNI BHŪTĀNI SAMVĀÑCHANTI.

That (Brahman) is *Vana*[1] by name. One should meditate upon It as *Vana*. He who knows this thus, him all beings fully seek.

Tad tad vanam: That Brahman possessing such greatness is of the name of *Vana* because of Its being *Vananiya* desireable, covetable. Therefore that Brahman should be meditated upon as *Vana*. This is the meaning.

The teacher then teaches the fruit of the meditation (of It) as *Vana*. The meaning is that he (meditator) is desired by all.

IV. 7. UPANIṢADAM BHO BRŪHITI. UKTĀ TA UPANISAD. BRĀHMĪM VĀVA TA UPANISADAM ABRŪMETI.

(The pupil) then asked "Please teach me the Upaniṣad." (Teacher) replies: "We have taught you the Upanisad. Verily the Upaniṣad that relates to Brahman."

Whilst the fact remains that one attains strength through the Self (Brahman), on the pupil having asked "Please teach me the Upaniṣad which declares the means of attaining God's grace which causes the attainment of Brahman," the other (namely teacher) says "We have taught you the Upaniṣad that relates to Brahman."[2]

1 Śankara. *Tadvanam: tasya vanam tad-vanam Atas tadvanam nāma prakhyātam Brahma.*

2. IV. 7. *Brāhmim* is interpreted in Śankara's *Vākya-bhāṣya* to mean the Upaniṣad that belongs to the Brahman caste Adhunā brāhmin vava te tubhyam brahmano brāhmanajāteḥ Upaniṣadam abrūma vakṣyāmaḥ ityarthaḥ

In his *Pada-bhāṣya* he says that *tapas*, karma, etc., are not in any way required by the Upaniṣad already taught as helpful to the knowledge so far instructed as he finds that the Upaniṣadic Instruction concludes here alone: nanu nāvadhāranam idam yato 'nyadvaktavyamityāha. Tasyai tapo dama ityādi. satyam vaktavyam ucyata ācāryena. na tūktopanisacchesatayā tatsahakāri sādhanāntarābhiprāyena vā. Kintu brahmavidyāprāptyupāyābhiprāyena.

We have already taught you the important Upanisad that instructs you about Brahman. Therefore the important Upaniṣad has already been taught.

If you wish to hear the Upanisad concerning the subsidiaries (to the *Brahma-vidyā*), I shall teach you. This is the idea.

IV. 8. TASYAI TAPO DAMAH KARMA CA PRATIṢṬHĀ VEDĀH SARVĀÑGĀNI SATYAM ĀYATANAM.

Austerity, Continence, and Action are the means for getting established (in Brahman). Vedas, (and) all its subsidiaries, (and) truth, are Its abode.

tasyai tapo damaḥ karma ca: The means of the Upaniṣad already described are *tapas* which means the emaciation of the body, the restraint of the organs and the performance of actions (such as Agnihotra etc.), (*nityanaimittika*).

pratiṣṭhā : means of getting the Brahman's knowledge called Upaniṣad established.

Vedāḥ: The Vedas with their six subsidiaries and truth-speaking are the cause of birth of Brāhmic knowledge. This is the meaning.

IV. 9. YO VĀ ETĀM VEDĀPAHATYA PĀPMĀNAM ANANTE SVARGE LOKE JYEYE PRATITIṢṬHATI PRATITIṢṬHATI

Whoever knows this (Upaniṣad), shorn of his sins, establishes himself in the Svarga world, infinite and transcendent

Etām: He who knows this Brahman-knowledge with the *pratiṣṭhā (means) and āyatana* (abode) described already, shaking off all his sins gets established in the svarga-world that is, the Vaikuntha world, the most transcendent, beyond the limitations of time. This is the meaning.

Svargaloka : The term 'svargaloka' means the world of Bhagavān on account of co-mention with the words 'Infinite' and 'most transcendent.'

———

VI. 6. TADDHA TADVANAM NĀMA TADVANAM ITYUPĀSITAVYAM. SA YA ETAD EVAM VEDĀBHI HAINAM SARVĀṆI BHŪTĀNI SAMVĀÑCHANTI.

That (Brahman) is *Vana*[1] by name. One should meditate upon It as *Vana*. He who knows this thus, him all beings fully seek.

Tad tad vanam : That Brahman possessing such greatness is of the name of *Vana* because of Its being *Vananiya* desireable, covetable. Therefore that Brahman should be meditated upon as *Vana*. This is the meaning.

The teacher then teaches the fruit of the meditation (of It) as *Vana*. The meaning is that he (meditator) is desired by all'

IV. 7. UPANIṢADAM BHO BRŪHITI. UKTĀ TA UPANIṢAD. BRĀHMĪM VĀVA TA UPANIṢADAM ABRŪMETI.

(The pupil) then asked "Please teach me the Upaniṣad." (Teacher) replies: "We have taught you the Upaniṣad. Verily the Upaniṣad that relates to Brahman."

Whilst the fact remains that one attains strength through the Self (Brahman), on the pupil having asked "Please teach me the Upanisad which declares the means of attaining God's grace which causes the attainment of Brahman," the other (namely teacher) says "We have taught you the Upaniṣad that relates to Brahman"[2]

1 Śankara · *Tadvanam . tasya vanam tad-vanam. Atas tadvanam nāma prakhyātam Brahma.*

2. IV. 7. *Brāhmīm* is interpreted in Śankara's *Vākya-bhāṣya* to mean the Upanisad that belongs to the Brahman caste Adhunā brāhmīn vava te tubhyam brahmano brāhmanajāteḥ Upaniṣadam abrūma vakṣyāmaḥ ityarthaḥ

In his *Pada-bhāṣya* he says that *tapas*, karma, etc., are not in any way required by the Upanisad already taught as helpful to the knowledge so far instructed, as he finds that the Upanisadic instruction concludes here alone: nanu nāvadhāranam idam yato 'nyadvaktavyamityāha. Tasyai tapo dama ityādi. satyam vaktavyam ucyata ācāryeṇa. na tūktopaniṣaccheṣatayā tatsahakāri sādhanāntarābhiprāyeṇa vā. Kintu brahmavidyāprāptyupāyā bhiprāyeṇa.

We have already taught you the important Upanisad that instructs you about Brahman. Therefore the important Upaniṣad has already been taught.

If you wish to hear the Upanisad concerning the subsidiaries (to the *Brahma-vidyā*), I shall teach you. This is the idea.

IV, 8. TASYAI TAPO DAMAH KARMA CA PRATIṢṬHĀ VEDĀH SARVĀÑGĀNI SATYAM ĀYATANAM.

Austerity, Continence, and Action are the means for getting established (in Brahman). Vedas, (and) all its subsidiaries, (and) truth, are Its abode.

tasyai tapo damaḥ karma ca: The means of the Upaniṣad already described are *tapas* which means the emaciation of the body, the restraint of the organs and the performance of actions (such as Agnihotra etc.), (*nityanaimittika*).

pratiṣṭhā : means of getting the Brahman's knowledge called Upaniṣad established.

Vedāḥ: The Vedas with their six subsidiaries and truth-speaking are the cause of birth of Brāhmic knowledge. This is the meaning.

IV, 9. YO VĀ ETĀM VEDĀPAHATYA PĀPMĀNAM ANANTE SVARGE LOKE JYEYE PRATITIṢṬHATI PRATITIṢṬHATI.

Whoever knows this (Upaniṣad), shorn of his sins, establishes himself in the Svarga world, infinite and transcendent

Etām: He who knows this Brahman-knowledge with the *pratiṣṭhā* (means) and *āyatana* (abode) described already, shaking off all his sins gets established in the svarga-world that is, the Vaikuṇṭha world, the most transcendent, beyond the limitations of time. This is the meaning.

Svargaloka : The term 'svargaloka' means the world of Bhagavān on account of co-mention with the words 'Infinite' and 'most transcendent.'

"Let that Rāmānuja, the great Muni, the munificent, the wind to the cotton of mere debators who frequent the paths of Vāmāgama, the wrong scriptures, who brought into being the nectar of Bhāṣya out of love for the welfare of the gods on earth, bless my work."